९३
७५(A)

अथ

९३
15(A)

"कैवल्योपनिषद्दीपिका"

श्रीशङ्करानन्दविरचिता

ब्रह्मविद्यायाः साक्षाद्धेतुं मरणान्यथानामर्थस्य च ब्रह्मणो वाङ्मनसातीतत्वादन्तः सोपायां नाम्नाह ॥ श्र
द्धाभक्तिध्यानयोगादवेहि ॥ श्रद्धा आस्तिक्यबुद्धिः भक्तिर्भजनं तदेकतात्पर्यबुद्धिः ॥ ध्या
नं विजातीयप्रत्ययशून्यसजातीयप्रत्ययप्रवाहः ॥ एतेषां योगः संबन्धः एतत्कारणमितियावत् ॥
तस्मात् ॥ अवेहि जानीहि ॥ इदानीं यथा श्रद्धाभक्तिध्यानयोगो ब्रह्मविद्यायाः कारणं तद्वत्संन्यासोपी
त्याह ॥ न कर्मणा ॥ श्रौतेन स्मार्तेन वा ॥ न प्रजया ॥ पुत्रादिना ॥ न धनेन ॥ दैवेन मानुषेण वा वित्तेन
नेति पूर्वमनुषज्यते ॥ अमृतत्वमिति वक्ष्यमाणानुषंगः ॥ कर्मप्रजाधनपदे पूर्वगतम् ॥ त्यागेन ॥
निखिलश्रौतस्मार्तकर्मपरित्यागेन पारमहंस्याश्रमरूपेण ॥ एके ॥ महात्मानः संप्रदायविदः अ
२।१॥ मृतत्वं अविद्यादिमरणभावराहित्यं ॥ आनशुः ॥ आनशिरे ॥ प्राप्ताः ॥ एवं स्तुते संन्यासे परेण ॥
परस्तात् ॥ नाकं ॥ कं सुखं तद्विरोधि दुःखमकं न अकं यस्मिन् स नाकः ॥ स्वर्गः सोपरीत्यर्थः ॥
अथवा परेण परं नाकमानंदात्मानं निहितं ॥ प्रक्षिप्तं धात्रा ॥ गुहायां बुद्धौ ॥ विभ्राजते ॥ विशेषणस्वयंप्रका त्रा
शत्वेन दीप्यते ॥ यत् ॥ प्रसिद्धं विश्वव्यापि स्वरूपं ॥ यतयः ॥ यतनसंन्यासाः प्रयत्नवन्तो ब्रह्मसाक्षात्का
रसंपन्नाः ॥ विशंति ॥ प्रविशंति ॥ इदं वयं स्म इति साक्षात्कारेण तदेवाभवंतीत्यर्थः ॥ यतीनां विशेषणा प
माह ॥ वेदान्तविज्ञानसुनिश्चितार्थाः ॥ वेदांताः प्रसिद्धास्तेभ्यो जातं विज्ञानं विशिष्टं अहं ब्रह्मास्मी
ति ज्ञानं तस्मिन्नेव सुनिश्चितोर्थः प्रयोजनं येषां ते ॥ अथवा सुनिश्चितो यमित्थमेवेति ॥ सम्य

स्मी२

गवधारितो ब्रह्मलक्षणोर्थो विधेयो यैस्ते वेदान्तविज्ञानसुनिश्चितार्थाः ॥ संन्यासयोगात् ॥ सम्यक्कृतं
न वित्तादिवल्लौकिकद्रव्यभोगसंन्यासः त्यागः संन्यासः तस्य योगो हि संन्यासधर्मीति बोधस्तस्मात् ॥ यतयः ॥
व्याख्याता पुनरादाने विशेषणकथनार्थं ॥ शुद्धसत्त्वाः ॥ शुद्धं रागादिकषायरहितं सत्त्वमंतःकरणं येषां
ते शुद्धसत्त्वाः एवंभूता अपि कृतप्रवृत्तिबंधादस्मिन् शरीरे सन्न साक्षात्कारश्चेत् तदा ते कृ
ए स्यमृतयः ॥ ब्रह्मलोकेषु ब्रह्मणः कार्ये सत्यलोक एव तस्यानेकभूमिकाप्रासादवत् ॥ अधक्षपर्यादिक्षु
गेनावस्थितावहवपदेनाभिधीयंते ॥ तेषु ब्रह्मलोकेषु परांतकाले ॥ परस्य कार्यस्य ब्रह्मणोऽं
तकाले विनाशकाले द्विपरार्धावसाने ॥ परान्तकालस्तस्मिन् ॥ परामृतात् ॥ अत्यन्तादमरणधर्मात्
व्याकृतात् ॥ परिमुच्यन्ति ॥ विमुच्यन्ते ॥ सर्वतो विमुक्ता भवन्ति ॥ सर्वे ॥ निखिलाः ॥ ब्रह्मणा सह ते सर्वे श्रुतेः
संप्राप्ते प्रतिसंचरे परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति ॥ इदानीं ब्रह्मज्ञानावाप्त्यर्थमु
पासनं कर्तुमुपवेशनार्थं देशविशेषादिकमाह ॥ विविक्तदेशे च ॥ एकान्तप्रदेशे चरोद्यादव्या
कुलोकालोपि ॥ सुखासनस्थः ॥ सुखं मनुद्वेगकरं दर्भाद्यासनं सुखासनं तस्मिन् स्थितः ति
सुखासनस्थः ॥ शुचिः ॥ बहिरन्तःशौचवान् ॥ समग्रीवशिरःशरीरः ॥ समानि ग्रीवा च शिर
श्च शरीरं च यस्य स समग्रीवशिरःशरीरः ॥ ननु कथिकपद्मकाद्यासनस्थ इत्यर्थः ॥ अ

ला

॥२॥

स्याश्रमस्थः। अत्याधिको ब्रह्मचारिगृहस्थवानप्रस्थकुटीचकबहूदकहंसेभ्य आ
श्रमः पारमहंस्यलक्षणो आश्रमस्तस्मिन्नतिष्ठतीत्यत्याश्रमस्थः। सकलेंद्रियाणि
निर्विंनिसमनस्का निज्ञानकर्मेंद्रियाणि निरुध्य स्वस्वप्रचारेभ्यो वरुध्य। भक्त्या।
दवबद्दवाराधिकाद्दा। स्वगुरुं। स्वस्य तत्त्वमसीत्यर्थस्यावबोधकं। प्रणम्य।
प्रकर्षेण नत्वानंतरं। हृत्पुंडरीकं हृदयकमलं पंचाक्षिद्रादिविशेषणं विरजं।
विरजस्कं अपगतरागद्वेषादिकं विशुद्धं। विगतसमस्तदुःखादिदोषं। विचिंत्य
विशेषेण ध्यात्वा। मध्ये हृदयपुंडरीकस्यांतः। विशदं। निर्मलं। शुद्धस्फटिकास
काशमित्यर्थः। विशोकं। विगतशोकजदुःखं विशोकं आनंदपूर्णहृदयं स्मेराननं ॥२॥
चित्यर्थः। व्यक्तत्वं अचिंत्यं वाङ्मनसातीतत्वेन प्रत्ययसंतत्यविषयं वाङ्मनसा

९८९

९३ / 72(अ)

93 / 15(अ)

॥श्रीगणेशाय नमः॥ कैवल्याख्योपनिषदं कैवल्यार्थावबोधिनीं। व्याख्यास्ये ... नकैवल्यात्मा प्रसीद
तु भगवती श्रुतिर्मतिन सुखप्रतिपत्त्यर्थं कथनाश्वलायनगुरुशिष्याख्यायिकामवतारयति। अथेति निघाय
नास्तिकेयं तं नयिति। अथ साधनचतुष्टयसंपत्त्यनंतरं आश्वलायनो॥ आश्वलायनाचार्यः। भगवंतं पूज्यावं
तं परमेष्ठिनं। सर्वोत्कृष्टस्थाननिवासी परिसमेत्य। शास्त्रीयेण विधिना समीपमागत्य उवाच। उक्तवान्॥
अधीहि। मह्यमुपदिश। भगवन्। हे समग्रधर्मज्ञानवैराग्यैश्वर्ययशःश्रीमन्। ब्रह्मविद्यां ब्रह्मण
देशकालवस्तुपरिच्छेदशून्यस्य विद्यां बुद्धिरूपां ... कारकारणं तां। वरिष्ठां॥ अतिशयेन श्रेष्ठां।
श्री सदा। नित्यं। सद्भिः। देहादिष्वात्मबुद्धिशून्यैः। सेव्यमानां। हृदये धियमाणां। निगूढां सर्वे
भ्यो गोप्यां सेवाविद्यमानत्वेन विद्यमानां नाम अप्य विद्ययानितरां संवृतां। यया ब्रह्मविद्यया॥ अ
चिरात्॥ अदीर्घेण कालेन॥ सर्वपापं। निखिलदुःखकारणमज्ञानं ससंस्कारं। व्यपो
ह्य॥ विविधं परित्यज्य विनाश्येत्यर्थः॥ परात्॥ सर्वजगत्कारणादव्याकृतात्॥ परं॥ उत्कृ ल
ष्टं॥ अज्ञानाश्रयविषयलोप्यं॥ पुरुषं। परिपूर्णं॥ याति॥ प्राप्नोति॥ विद्वान्॥ अहमेवास्मी
स्मीति॥ साक्षात्कारवान्॥ एवं पृष्टः॥ तस्मै स्वशिष्याय ब्रह्मविद्यार्थिने॥ सः॥ उक्तः॥ स्वयं
स्तः॥ ह॥ किल॥ उवाच॥ उक्तवान्॥ पितामहश्च॥ जगत्पितॄणां दक्षादीनां पिता॥ पितामहः॥ कृ
मलासनश्च चकारोपिकारार्थः॥ स पितामहोप्युवाच नतूपेक्षां कृतवानित्यर्थः॥

तं। प्रसन्नवदनेंद्रियं। ध्यात्वा। प्रत्ययप्रवाहेण साक्षात्कृत्य। मुनिः। मननशीलः। गच्छति। प्राप्नो
ति। भूतयोनिं। आकाशादिमहाभूतकारणं। तर्हि किं कारणत्वोपाधिकमित्याशंक्य नेत्याह। स
मस्तसाक्षिं। समस्तसाक्षिणं। सर्वबुद्धिप्रचारद्रष्टारं। साक्षित्वमपि न केवलस्येत्यत आह।
तमसः। आवरणविक्षेपशक्तिरूपाया अविद्यायाः परस्तात्। परतः। अविद्यासंबंधशून्य
मित्यर्थः। उमासहायउपासनातः प्राप्यो निरविद्यो विद्यादशायां सर्वात्मेत्याह। सः। उक्तः। ब्रह्मा।
प्रथमशरीरी कार्यकारणभूतः। सः। उक्तः। शिवः। उमासहायः। सेंद्रः। सः। उक्तः। इंद्रस्त्रिलोक
पतिः। सः। उक्तः। अक्षरः। विनाशरहितः। परमः। उत्कृष्टः। स्वराट्। अन्यानपेक्षत्वेन स्वय
मेव राजत इति स्वराट्। स एव। उक्त एव। विष्णुः। व्यापनशीलः। शंखचक्रगदाधरः॥ ॥३॥
॥३॥ सः। उक्तः। प्राणः। प्राणादिपंचवृत्तिरूपः। सः। उक्तः। कालाग्निः। कालरूपी वैश्वानरः।
सः। उक्तः। चंद्रमाः। राशीकः। स एव। उक्त एव। सर्वं। निखिलं। यत्। प्रसिद्धं भूतं॥
अतीतं। यच्च। यदपि। भव्यं। भावि च कार्यरूपं मानमपि। सनातनं। चिरंतनं। ज्ञात्वा। अहं
ब्रह्मास्मीति साक्षात्कृत्य। तं। उक्तमानंदात्मानं। मृत्युं। अविद्यासंस्कारं। अत्येति। अ

तीत्य गच्छति। नान्यः। उक्तात्मब्रह्मज्ञानाद्व्यतिरिक्तः। पंथाः। मार्गः। विमुक्तये। विमुक्त्यर्थं
नास्तीति शेषः। यदा त्रयाणां विश्वतैजसप्राज्ञानां विराड्हिरण्यगर्भेश्वराणां वा स्वयंप्रकाशत्वे
न लोचनं प्रकाशस्वरूपं त्रिलोचनं नीलं तमो ज्ञानं कंठे कंठवत् त्रिदेहैकदेशे अधिकरणभिन्नचेत
न्यस्य वर्तते यस्य स नीलकंठस्तमिति व्याख्यानं तदाविशदमविद्यारहितं। विशोकं दुःखसंस्काररहि
तं उमासहायं ब्रह्मविद्यासहायं प्रशांतं पुनरुत्थानसंस्कारवर्जितमिति निर्गुणपरत्वेन समग्रं वाक्यम
वगंतव्यं। निर्गुणस्याप्युपलब्धिस्थलत्वेन हृदयप्रदेशमध्यस्थत्वमविरुद्धं तथा च ध्यात्वा मननिदिध्यास
नेहत्वेसेतदप्युपपन्नमेव। सर्वभूतस्थं। निखिलेषु स्थावरजंगमेषु तिष्ठतीति सर्वभूतस्थः। तं। आ
त्मानं। अस्मत्प्रत्ययव्यवहारयोग्यं। सर्वभूतानि च। निखिलानि स्थावरजंगमानि भूतानि सर्वभू
तानि च कार्यं आधाराधेयभावव्युत्क्रमार्थः। आत्मनि। आनंदात्मन्यहंप्रत्यययोग्ये। संपश्यन्। स
म्यक् संशयविपर्ययमंतरेणावलोकयन्। ब्रह्म। बृहद्देशकालवस्तुपरिच्छेदशून्यं। परमं उत्कृ
ष्टमनुपचरितमित्यर्थः। याति। प्राप्नोति। न याति इति देहलीप्रदीपन्यायेन संबध्यते। न याति। नेश्रा

ज्ञाति अन्येन। उक्तबोधव्यतिरिक्तेन। हेतुना। कारणेन। ध्यात्वा गच्छतीत्यस्य व्याख्यानं ज्ञात्वा तमित्या
दिना अन्यः पंथा विमुक्तये इत्यस्य व्याख्यानं इदं सर्वं नूतस्थमित्यादि। यदा त्वेवं ज्ञानं नोत्पद्यते तदा
तदुत्पाद उपायमाह। आत्मानं। अंतःकरणं। अरणिं। वह्निजनकं मंत्रसंस्कृतं काष्ठं कृत्वा अधो
विधाय। अधरारणित्वेन चिंतयित्वेत्यर्थः। प्रणवं। ॐकारं चोत्तरारणिं चकारः कृत्वेत्येतद
नुवृत्त्यर्थः। ज्ञाननिर्मथनाभ्यासात्। ज्ञानस्य सद्यात्मिको हमस्मीत्येवंरूपस्य मथो निर्मथनं यु
क्तिभिर्विलोडनं तस्याभ्यास आवृत्तिरूपो ज्ञाननिर्मथनाभ्यासस्तस्मात्। उत्पन्नेनाहं ब्रह्मास्मी
तिसाक्षात्काराग्निना। पाशं। आत्मनो बंधनरूपमज्ञानरज्जुरचितमहं ममादिग्रंथिं। दहति।
॥५॥ भस्मीकरोति। पंडितः। पंडाहं ब्रह्मास्मीतिबुद्धिस्तां प्राप्तः पंडितः। नन्वस्यासंगोदासीनस्याद्वि
तीयस्य कुतः संसारः पाशरूप इत्यत आह। स एव। उक्तो संगोदासीन एव। न त्वन्यः। मायाप ॥५॥
रिमोहितात्मा। मायाविद्या आवरणविक्षेपकरी शक्तिः तया परिमोहितः स्वयंप्रकाश आनं
दात्मा स्वस्वरूपो मायापरिमोहितात्मा। शरीरं स्थूलादिभेदभिन्नं मनुष्यादिकलेबरं आ

तीतत्वे हेतुः। अव्यक्तं। शब्दाद्यशेषविशेषशून्यत्वादस्पष्टमव्यक्तं। असत्त्वं परिच्छेदं वा वारयति। अनं
तरूपं। न विद्यतेतत् इयत्ता रूपाणां शरीराणां यस्य सोनंतरूपस्तं देशकालवस्तुपरिच्छेदशून्यं
वानंतरूपं। शिवं। मंगलरूपं। प्रशांतं। अविद्यादिदोषरहितं। अमृतं। कालत्रयासंस्पृष्टं। अमृतत्व
दाभिरतिशयानंदरूपत्वेन। ब्रह्म। बृहत्सर्वस्मादत्यधिकं। योनिं। जगज्जन्मादिकारणं। तथा। यथै
तद्विशेषणजातं तद्वत्स्वरूपमपि। आदिमध्यांतविहीनं। उत्पत्तिपरिच्छेदविनाशवर्जितं तत्र
हेतुः। एकं। द्वितीयवस्तुमात्ररहितं। विभुं। समर्थं व्यापिनं वा। चिदानंदं। स्वयंप्रकाशमानं निरति
शयानंदं। अरूपं। चिदानंदव्यतिरिक्तरूपरहितं। ततः। अद्भुतं। आश्चर्यकरं। उमासहायं। उमा ब्र
ह्मविद्या सहायः कामादिपाटच्चररक्षिका यस्य अर्द्धनारीशरीरत्वेन वामांकस्थिता अनुपमयुव
तिरूपत्वेन वा यस्य स उमासहायस्तं। परमेश्वरं। उत्कृष्टब्रह्मादिनियंतारं। प्रभुं। समर्थं। त्रिलो
चनं। त्रीणि सोमसूर्याग्न्यात्मकानि लोचनानि यस्य स त्रिलोचनस्तं। नीलकंठं। कृष्णकंठं। प्रशां

त।प्रकर्षेणमुक्तोभवति। इदानींसर्वस्मात्प्रपंचाद्वैलक्षण्यमाह। त्रिषु। जागरणस्वप्नसुषुप्तेषुधामसु
स्थानेषु। यत्। प्रसिद्धं। भोग्यं। स्थूलप्रविविक्तानंदरूपं। भोक्ता विश्वतैजसप्राज्ञाख्यः। भोगश्च।
स्थूलप्रविविक्तानंदभोगोपि च शब्दादधिदैवादिविभागोपि। यत् उक्तं। त्रिधामस्तोऽन्यादि
च प्रपंचजातं। भवेत्। स्पष्टं। तेभ्यः। त्रिधामादिभ्यः। विलक्षणः। विपरीतलक्षणः। वैलक्षण्यमाह। सा
क्षी। साध्यस्तस्य विश्वस्य द्रष्टा। चिन्मात्रः। चिदेकरसः। अहं। अहंप्रत्ययव्यवहारयोग्यः। सदाशि
वः। कैवल्यात्मा नित्यकल्याणरूपो महेश्वरः। प्रपंचवैलक्षण्यमुक्त्वा इदानीं जगज्जन्मादिकारणत्वम
ग्र ५ पि स्वस्याह। मय्येव। मत्त एव ब्रह्माभिन्नान्नत्वन्यस्मात्। सकलं। निखिलं। भूतभौतिकप्रपंचजातं। जात
॥६॥ मुत्पन्नं मयि ब्रह्माभिन्ने। सर्वं। निखिलं विश्वं। प्रतिष्ठितं। प्रकर्षेण स्थितिं प्राप्तं मयि। सर्वं। व्याख्यातं। लयं ॥६॥
याति। विनाशं गच्छति। तत्। तस्मात् सर्वजगज्जन्मस्थितिध्वंसकारणत्वात्। ब्रह्माद्वयं देशकालवस्तुप
रिच्छेदशून्यं। अद्वयं। ज्ञातृज्ञेयादिविभागशून्यं। अस्मि। भवामि। अहं। ब्रह्मणो वगंता। जगज्जन्मस्थितिध्वं
सकारणत्वात् जगत्कारणत्वेन विकारित्वं प्राप्तं तद्देतदतिदुर्बोधस्वरूपत्वेन वारयति। अणोः। अणु
परिमाणस्तात्। अणीयान्। अतिशयेनाणुः। अहमेव। जगत्कारणमहंप्रत्ययव्यवहारयोग्यो न त्वन्यः।

स्थाय। अहं मनुष्य इत्याद्यभिमानमासमंतात् स्वीकृत्य करोति सर्वं निखिलं व्यापारजातं कु
य रुते। स्त्र्यन्नपानादिविचित्रभोगैः। स्त्रियो मनोनुकूला युवत्यः अन्नपाने मनोनुकूले आ
दिशब्देन वसनाच्छादनादीनि मनोनुकूलानि। तैः स्त्र्यन्नपानादिभिर्विचित्रैर्भोगै
र्विचित्रभोगैः तत्र स्त्र्यन्नपानादिविचित्रभोगैः। स्त्र्यन्नेति च्छांदसं। स एव। मायापरि
मूढ एव न त्वन्यः। जाग्रत्। जागरणमिंद्रियैर्बाह्यविषयोपलब्धिरूपं कुर्वन्। परि
तृप्तिं। सर्वतो विषयसुखजातैः परितृप्तिस्तां। एति। गच्छति। सुखं दुःखं च प्रा
प्नोतीत्यर्थः। इदानीं स्वप्नसुषुप्त्योर्विक्षेपतदभावकथनेन संसारमोक्षयोरर्थाद्दृष्टांतमा
ह। स्वप्ने। इंद्रियग्रामोपरमरूपायां स्वप्नावस्थायां। जीवः। प्राणानां धारयिता विविधविषय ।सः।उक्तः।
वासनावासितः। सुखदुःखभोक्ता। सुखदुःखयोः प्रसिद्धयोर्भोक्ता। अहं सुख्यहं दुःखीत्येवंरूपप्र
त्ययवान्। सुखदुःखभोक्ता। तत्र संसारदृष्टांतेवास्तवत्वं वारयति। स्वमायया। स्वस्य तत्तद्देहाभि
मानिनो माया अज्ञानं विपरीतज्ञानं च तया। कल्पित। विश्वलोके। कल्पितवासनारूपे विश्वस्मिन्

रथरथयोगपथादिकेनिखिलेलोकेभुवनेजनेचकमिलविश्वलोकेस्वप्नेयथातद्वज्जागरणेपीस
र्थः।सुषुप्तिकाले।आनंदस्योगावसररसकलेनिखिलेविलीनेविशेषविज्ञानेस्वकारणलयंगते।एता
वत्सुषुप्तौमोक्षेचसमं।इयांस्तुविशेषः।तमोभिभूतः।अज्ञानावृतः।सुखरूपंसुखस्वरूपंस्वयंप्र
काशमानमानंदात्मस्वरूपं।एति।गच्छति।पुनश्च।आनंदात्मस्वरूपंप्राप्यभूयोपि।जन्मांतर
कर्मयोगात्।प्राग्भावीयकर्मानुसारात्।सएव।आनंदात्मस्वरूपंप्राप्तएवसुषुप्तिंगतोनत्वन्यः।
: जीवः।प्राणविधारकः।स्वपिति।स्वप्नावस्थानंगच्छतिसुषुप्तात्।अथवाबुद्धः।प्रबोधंजा
गरणंप्राप्तःभवतीतिशेषः।इदानींजीवब्रह्मणोरैक्यमाह।पुरत्रयेस्थूलसूक्ष्माज्ञानाख्येशरीरत्र
।।५।। येक्रीडति।विहरति।यश्चजीवः।चकारएवकारार्थः।प्रसिद्धःपरमात्मैवप्राणधारकः।ततस्तु ।।५।।
तस्मादेवजीवाभिन्नाद्ब्रह्मणःनत्वन्यस्मात्।जातं।उत्पन्नं।सकलं।निखिलं।विचित्रं।विविधकर्म
नामरूपंविश्वं।आधारं।रज्जुरिवसर्पधारावलीवर्दमूत्रितत्वादेः।सकलस्यविश्वस्या
धारभूतं।आनंदं।निरतिशयानंदस्वरूपं।अखंडबोधं।आनंदरूपत्वेपिस्वयंप्रकाशैक

स्वभावं।यस्मिन्।अखंडबोधे।लयं।विनाशं।याति।गच्छति।पुरत्रयंच।व्याख्यातं।चशब्दादन्यदपि।ए
ना तस्मात्।पुरत्रयाधिष्ठानात् बुद्धद्रष्टुः।जायते।उत्पद्यते।प्राणः।क्रियाशक्तिः।मनः।अंतःकरणं।ज्ञान
शक्तिः।सर्वेंद्रियाणिच।सर्वकर्मज्ञानेंद्रियाण्यपि।चशब्दाद्देहादिकमपि।खं।नभः।वायुः।नभस्वान्।ज्यो
तिः।तेजोधातुः।आपः।नीराणि।पृथिवी।भूमिः।विश्वस्य।निखिलस्यस्थावरजंगमात्मकस्यप्राणिजातस्य।
धारिणी।विधारिणी।इदानींमहावाक्यार्थमाह।यत्।प्रसिद्धं।परं।उत्कृष्टं।ब्रह्म।बृहद्देशकालवस्तुपरिच्छे
दशून्यं।सर्वात्मा।सर्वप्राणिहृदिस्थितः।सर्वनियंता।विश्वस्य।सर्वस्य।कार्यकारणजातस्य।आयतनं।
आधारभूतं।महत्।प्रौढं सर्वाधारत्वेनैव।सूक्ष्मात्।अणुपरिमाणात्।सूक्ष्मतरं।महदप्यतिशयेना
णु।नित्यं।विनाशशून्यं।तत्।उक्तं परंब्रह्म।त्वमेव।तदेवगंतैव।नत्वन्यत्।ननुतन्मत्तोन्यत् अहंतुतस्माद
न्यः।मयिकर्तृत्वादिविशेषोपलंभादित्यत आह।त्वमेवतत्।त्वं।कर्ताभोक्ता।विद्यया।वस्तुतस्तत्परंब्रह्मै
वनत्वन्यः।इदानीमेवंज्ञानफलमाह।जाग्रत्स्वप्नसुषुप्त्यादिप्रपंचं।ये तं।यत्।प्रसिद्धं।स्वयंप्रकाशं।प्र
काशते।प्रकाशयति।तत्।उक्तंस्वयंप्रकाशं।ब्रह्म।सत्यज्ञानादिलक्षणं।अहंब्रह्मैवगंता।विद्वानेवात्मा
इति।अनेनप्रकारेणज्ञात्वा।साक्षात्कृत्य।सर्वबंधैः।निखिलबंधैः।अहंममाद्यैःस्वसकारणैः।प्रमुच्य

३ × जाग्रत्स्वप्नसुषुप्त्यवस्थाः।तदाद्योविश्वविराडाद्यस्तएवप्र ×
× पंचोजाग्रत्स्वप्नसुषुप्त्यादिप्रपंच ×३

त्रह्मदेदव्यासरूपः। वेदविदेव च। वेदांतद्भतो विशेषणं। वेदानां सांगानां सामान्यविद्यास्थानानां वेत्ता वेदवित्। सएव
न तन्यः। चशब्दादनेकतपःसंपन्नश्च। अहं। व्याख्यातं अनेन। विभूतिमत्सत्वमिदमेव प्रधानमित्युक्तं। न पुण्यं न पापं
मम। स्पष्टं। स्वइति शेषः। नास्ति नाशः। विनाशो न विद्यते मम इत्यनुषंगः। न जन्म। जनिर्नमम अस्तीत्यनुषंगः। देहें
द्रियबुद्धिः देहश्चेंद्रियाणि च बुद्धश्च देहेंद्रियबुद्धि। नास्ति। न विद्यते। मम इत्यनुषंगः। न भूमिरापो मम। पृथि
का वी सोदं मम नास्तीत्यनुषंगः। वह्निवह्निः। प्रसिद्धः। नास्ति। न विद्यते मम इत्यनुषंगः। न चानिलोमेस्ति। वायुरपि
मम न विद्यते। चकाराद्वायवीयं कार्यमपि। न चांबरं च। आकाशमपि न मम अस्तीत्यनुषंगः। चकाराचा
काशकार्यतद्व्यतिरिक्तोक्तानुक्तभावार्थो। एवं। उक्तेन प्रकारेण विदित्वा। साक्षात्कृत्य। परमात्म
॥७॥ रूपं। उत्कृष्टानंदात्मस्वरूपं। गुहाशयं। बुद्धौ शयानं। निष्कलं निर्गताः प्राणश्रद्धाखवायुज्यो
तिरप्पृथिवींद्रियमनोन्नवीर्यतपोमंत्रकर्मलोकनामाख्यकला यस्य तं। अद्वितीयं। सजा ॥७॥
तीयविजातीयद्वितीयवस्तुशून्यं। समस्तसाक्षिं। समस्तसाक्षिणं। सर्वद्रष्टारं। सदसद्विहीनं। भा
वाभावविवर्जितं। तदेव निरवद्यं गच्छतीत्याह। प्रयाति शुद्धं परमात्मरूपं। स्पष्टं। एवंभूतं परमात्मानं
प्रतिपत्तुमशक्तस्याशुद्धांतःकरणस्यांतःकरणशुद्ध्यर्थमाह। यः। प्रसिद्धो मुमुक्षुरत्युत्सन्नसा

क्षात्कारः। शतरुद्रीयं। नमस्ते रुद्र इत्यादिरुद्राध्यायं। अधीते पठति। यथाशक्ति नित्यं। सः। शतरुद्रीयाध्यायकः।
अग्निपूतः। अग्निभिः श्रौतैः स्मार्तैः पवित्रीकृतोग्निपूतः भवति। स्पष्टं। सुरापानात्। मदिरापानात् महापातकदो
षात्। पूतो भवति। स्पष्टं। ब्रह्महत्यात्। ब्रह्महत्यायाः ब्रह्महत्यारूपान्महापातकदोषात्। पूतो भवति। स्पष्टं।
कृत्याकृत्यात्। कृत्यं करणीयं बुद्धिपूर्वकं पापमकृत्यमबुद्धिपूर्वकं पापं कृत्यं च अकृत्यं च कृत्याकृत्यं
तस्मात्। पूतो भवति। स्पष्टं। तस्मात्। शतरुद्रीयाध्ययनात्। अविमुक्तं। विरुद्धत्वेन मुक्ताः विमुक्ताः पशवः
तेभ्यो व्यतिरिक्तो विमुक्तः पशुपतिः। तं। आश्रितो भवति। स्पष्टं। अत्याश्रमी। अत्याश्रम उक्तः पारमहंस्यल
क्षणः स यस्यास्ति सोत्याश्रमी। सर्वदा। निरंतरं। सकृद्वा। कदाचिद्वा दिवसे दिवसे एकवारमित्यर्थः। वा श
ब्दो धिकारिसामर्थ्यानुसारेण व्यवस्थितविकल्पार्थः। अनेन। रुद्राध्यायजपेन। ज्ञानं। अहं ब्रह्मा
स्मीति साक्षात्काररूपं। आप्नोति। प्राप्नोति। संसारार्णवनाशनं। संसारसागरशोषणं। यस्मात् रुद्रा
ध्यायजपो शेषपापनिबर्हणद्वारा ब्रह्मज्ञानहेतुः। तस्मात्। ततः। एवं विदित्वा। उक्तेन प्रकारेण त्रिनेत्र
ध्यानरुद्राध्यायाध्ययनादिना विदित्वा। साक्षात्कृत्य। एनं। परमात्मानं। कैवल्यं। केवलस्यात्मनो भावः कैवल्यं
तत्फलं। पुरुषाभिलाषविषयं सर्वपुरुषार्थसमाप्तिभूतं। अश्नुते। प्राप्नोति। कैवल्यं फलमश्नुते।

व्याख्यातं।पादाभ्यास उपनिषदर्थपरिसमाप्त्यर्थः॥ ॥इति श्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्यस्य शंकरानंदभगवतः कृतिः कैवल्योपनिषद्दीपिका समाप्ता॥ ॥

॥८॥ ॥८॥

तद्वत्।यथा अणुस्तथा।महान्।सर्व्वस्मादप्यधिकः।अहं व्याख्यातं।अणीयसां महतां कारणानां च यथा भेदस्तथा तत्रापि
स्यादित्यत आह।विश्वं।सविधं।भूतभौतिकप्रपंचजातं।इदं।व्याख्यातं।अस्य तत्त्वभेदराहित्ये स्वस्मादप्यभेदस्या
दित्यत आह।विचित्रं।विविधं स्वयमनंतभेदवदित्यर्थः।तदभिन्नस्य तस्य तत्त्वाप्याधुनिकत्वं स्यादित्यत आह।पुरात
नः।चिरंतनः।आधुनिकसर्पधाराबलीवर्द्दभूमिनिंतत्वाद्यभिन्ना चिरंतनी रज्जुरिव।अहं व्याख्यातं।पुरुषः।परिपूर्णो
वस्तुतः।अहं।व्याख्यातं।अविद्यादशायां।ईशः।नियंता।नियंतृत्वसामर्थ्यमाह।हिरण्मयः।हिरण्मयो ज्ञानप्रचुरस्त
त्प्रधानो वा आदित्यस्थः।सर्व्वकार्यकारणात्मा।अहं।व्याख्यातं।शिवरूपं।मंगलस्वरूपं।ब्रह्म।अस्मि।भवामि।इदानीं
सर्व्वकरणहीनस्य सर्वज्ञतां स्वस्याह।अपाणिपादः।पाणिपादहीनः।अहं।व्याख्यातं।अचिंत्यशक्तिः।दुर्बोधशक्तिः।
एवंभूतोपि जवनो ग्रहीतेत्यर्थः।पश्यामि।अवलोकयामि।अचक्षुः।चक्षुर्हीनः।सः।अचक्षुर्दृष्टा।शृणोमि।श्र
वणं करोमि।अकर्णः।कर्णरहितः।अहं।व्याख्यातं।विजानामि।विविधं प्रपंचजातमवगच्छामि।विविक्तरूपः।
बुध्यादिपृथग्रूपः।न च।अस्ति।नास्त्येव।वेत्ता।कर्मकर्तृभावेनावगंता।मम।आनंदात्मनो भेदरहितस्य।चित्
स्वयंप्रकाशबोधस्वभावः।सदा।सर्व्वदा।अहं।व्याख्यातं।इदानीं सर्व्वशास्त्रप्रतिपाद्यस्यात्मनः सर्व्वविकारभा
वं दर्शयति।वेदैः।ऋगादिभिः।अनेकैः।बहुभिः।अहमेव।व्याख्यातं।वेद्यः।प्रतिपाद्यः।वेदांतकृत्।वेदांतसू

९३
१५ (B)

B-93
15 (B)

श्रीगुरुभ्यो नमः॥ हरिः ॐ॥ बृहस्पतिरुवाच याज्ञवल्क्यं यदनु वै कुरुक्षेत्रं देवा
नां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं म विमुक्तं वै कुरुक्षेत्रं देवानां देवयज
नं सर्वेषां भूतानां ब्रह्मसदनं तस्माद्यत्र क्वचन गच्छति तदेव मन्येते तिदं वै कुरु
क्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमत्र हि जंतोः प्राणेषूत्क्रममा
णेषु रुद्रस्तारकं ब्याचष्टे येनासावमृती भूत्वा मोक्षी भवति तस्माद विमु
क्तमेव निषेवेता विमुक्तं न विमुंचेद विमुक्तं न विमुंचेदेवमेवैतद्याज्ञवल्क्य
॥१॥ अथ हैनमत्रिः प्रपच्छ याज्ञवल्क्यं य एषोनंतो व्यक्त आत्मा तं कथमहं विजानी
यामिति स होवाच याज्ञवल्क्यः सो विमुक्त उपास्यो य एषोनंतो व्यक्तात्मा सो
विमुक्ते प्रतिष्ठित इति सो विमुक्तः कस्मिन्प्रतिष्ठित इति वरणायां च नास्यां च
मध्ये प्रतिष्ठित इति का वै वरणा का च नासीति सर्वानींद्रियकृतान्दोषान्वा
रयतीति तेन वरणा भवति सर्वानींद्रियकृतान्पापान्नाशयतीति तेन नासी भव
तीति कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोक

जा०बा०
२

त्रेयरैवर्तकप्रभृतयोव्यक्तलिंगाअव्यक्ताचाराअनुन्मत्तवदाच
रतस्त्रिदंडंकमंडलुंशिक्यंपात्रंजलपवित्रंशिखांयज्ञोपवितंचेत्येत
त्सर्वंभूस्वाहेत्यप्सुपरित्यज्यात्मानमन्विछेद्यथाजातरूपधरोनिर्द्वंद्वोनिष्परि
ग्रहस्तत्त्वब्रह्ममार्गेसम्यक्संपन्नःशुद्धमानसःप्राणसंधारणार्थंयथोक्त
कालेविमुक्तोभैक्षमाचरन्नुदरपात्रेणलाभालाभौसमोभूत्वाशून्यागा
रदेवगृहतृणकूटवल्मीवृक्षमूलकुलालशालाग्निहोत्रनदीपुलिनगि
रिकुहरकंदरकोटरनिर्झरस्थंडिलेष्वनिकेतवास्यप्रयत्नोनिर्ममः
शुक्लध्यानपरायणोध्यात्मनिष्ठोशुभकर्मनिर्मूलनपरःसंन्यासे
नदेहत्यागंकरोतिसपरमहंसोनामेति॥५॥इतिजाबालोपनि
षत्समाप्तं॥६॥

१३/१५(B)

13/15(B)

13/15 (CB)

२

त्येवमेवैतदाह ग्रामादग्निमाहृत्य पूर्ववदग्निमाघ्रापयेद्यद्यग्निं न विंदेद
प्सु जुहुयादापो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जुहोमि स्वाहेति हुत्वो
द्धृत्य प्राश्नीयात्साज्यं हविरनामयं मोक्षमंत्रस्त्रय्येवं विंदेत् तद्ब्रह्म तदुपासि
तव्यमेवमेवैतद्भगवन्निति वै याज्ञवल्क्यः ॥४॥ अथ हैनमत्रिः पप्रच्छ याज्ञ
वल्क्यं पृच्छामि त्वा याज्ञवल्क्यायज्ञोपवीती कथं ब्राह्मण इति स होवाच या
ज्ञवल्क्य इदमेवास्य तद्यज्ञोपवीतं य आत्मा प्राश्याचम्यायं विधिः परिव्रा
जिनां वीराध्वाने वानाशके वापां प्रवेशे वाग्निप्रवेशे वा महाप्रस्थाने वा
थ परिव्राड्विवर्णवासा मुंडोपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भ
वति यद्यातुरः स्यान्मनसा वाचा वा सन्यसेदेष पंथा ब्रह्मणा हानुवित्तस्ते
नेति सन्यासी ब्रह्मविदित्येवमेवैष भगवन्निति याज्ञवल्क्यः ॥५॥ तत्र पर
महंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वासा ऋभु निदाघ जडभरत दत्ता

६४ स्यपरस्य च संधिर्भवतीत्येतद्वै संधिं संध्यां ब्रह्मविदः उपासत इति सो विमुक्त
उपास्य इति सो विमुक्तं ज्ञानमाचष्टे यो वै तदेतदेवं वेद ॥ अथ हैनं ब्रह्मचारि
ण ऊचुः किं जाप्येनामृतत्वं ब्रूहीति स होवाच याज्ञवल्क्यः शतरुद्रीयेणेत्येता
नि ह वा अमृतस्य नामधेयान्येतैर्ह वा अमृतो भवतीति ॥३॥ अथ ह जनको
मे वैदेहो याज्ञवल्क्यमुपसंत्योवाच भगवन्संन्यासमनुब्रूहीति स होवाच याज्ञव
ल्को ब्रह्मचर्यं समाप्य गृही भवेद्गृहाद्वनी भूत्वा प्रव्रजेद्यदि वेतरथा ब्रह्मचर्यादे
व प्रव्रजेद्गृहाद्वा वनाद्वा ॥ अथ पुनरव्रती वा व्रती वा स्नातको वास्नातको वा
उत्सन्नाग्निको वा रनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्तद्धैके प्र
जापत्यमेवेष्टिं कुर्वंति तदु तथा न कुर्यादाग्नेयीमेव कुर्यादग्निर्हि प्राणः प्राणमेवै
त तयाकरोति त्रैधातवीयामेव कुर्यादेतयैव त्रयो धातवो यदुत सत्त्वं रजस्तम इत्य
यं ते योनिरृत्विया यतो जातो अरोचथाः तं जानन्नग्न आरोहाथा नो वर्ध
या रयिमित्यनेन मंत्रेणाग्निमाजिघ्रेदेष वा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वाहे

मरुदेशसूच्यते। मायां जगतः परिणामिकारणत्वेन पश्यंतीत्युक्तं मायायाः स्वरूपप्रदत्वेन स्फुरणप्रदतया चाधिष्ठानत्वान्मायावि
लसितस्तत्तन्मात्रप्रमुखानि तानि निखिलानि सर्वाणि तानि पूर्वोक्तानि कालप्रभृतीन्यात्मपर्यंतानि तत्संयुक्तो व्यष्टिभूतानि या
नि तानि कालात्मयुक्तानीत्युच्यंते तानि सर्वाणि स्वरूपप्रदतया आनंदप्रदतया स्फुरणप्रदतया चाधितिष्ठति यः सच्चिदानंदै
करस एको द्वितीयः परमात्मा। तमपि सर्वाधिष्ठानत्वेन निर्वाहकमपश्यन्। पूर्वमंत्रोक्तप्रकारेण मायायैक्याध्यासमुपपन्न
त्वेन जगदुत्पत्तिस्थितिलयकारणभूतं सत्यसंवित्सुखैकरसमात्मानं चक्रत्वेन निरूपयत्युत्तरो मंत्रः वेत्यमुहेतोः।
॥ तमेकनेमिं त्रिवृतं षोडशांतं शतार्धारं विंशतिप्रत्यराभिः। अष्टकैः षड्भिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैक
मोहं॥४॥ तं देवयत्रादिनिर्दिष्टमधिष्ठातारमात्मानं सर्वमंत्रे त्राक्रियाद्वनि देशे तत्र चक्रमायाचाद्विनिर्दिष्टे कारणेऽप्रकृ
तिः संसारस्थभ्रमणनिर्वाहकत्वेन नेमिः सा यस्य तमेकनेमिं त्रिवृतं त्रिभिः सत्वरजस्तमोभिः वृतं तत्संपर्कनिमित्तत्वविशिष्ट
तिसंसारचक्रात्मकब्रह्मविस्तृतिरूपाख्याभिः त्रिस्तरिर्मूर्तिविशिष्टांतमानंतं षोडशांतं प्राणश्रद्धाखस्त्रतपयकेंद्रिय
मनोन्नवीर्यतपोमंत्रकर्मलोकनामाख्याः प्रश्नोपनिषत्पठिताः षोडशकलाः अंत एवसानं समाप्तिर्यस्य तं षोडशांतं श
तार्धिकारांतो यस्य तं विविधजगत्सृष्टिवैचित्र्यविशिष्टस्य कारणभूता अकारादिपंचाशद्वर्णा अरा इवारास्तो
यस्य तं शतार्धारं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थ तद्विषयशब्दस्पर्शरूपरसगंधवचनादानविहरणो
त्सर्गानंदतदधिदेवतादिग्वाय्वादित्यवरुणपृथिव्यग्नीन्द्रोपेन्द्रविक्रमप्रजापतिमनोबुद्ध्यहंकारचित्तमंतव्यबो प
द्धव्याहंकर्तव्यचेतयितव्यतदधिदेवतचंद्रबृहस्पतिरुद्रक्षेत्रज्ञतमस्सात्त्विकारतदधिदेवेश्वरप्राणापानव्यानोदानस
मानाः पंचाशदरा विंशतिप्रत्यराभिः अष्टौ वसवो द्वादशादित्या एकादश रुद्राः पाणि तद्विषयाश्च याः प्रत्यराः पूर्वोक्ता
नामराणां स्थापयितुं प्रतिविधीयते प्रत्यराभिः प्रत्यरैः पुक्ते स्त्रीलिंगं छांदसं। अष्टकैः षड्भिरिति दीपोक्तेष्टक
धर्मोत्सरुधिरमेदोस्थिमज्जाशुक्रं धात्वष्टकं धर्मज्ञानवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्याणीति
भावाष्टकं। शौचमौक्तदयाक्षांत्यनसूयाशौचमंगलानायासकार्पण्यास्पृहत्वानि गुणाष्टकं। अणिमामहिमा
लघिमागरिमा प्राप्तिः प्राकाम्यमीशित्ववशित्वमैश्वर्याष्टकं। भूमिरापोनलो वायुः खं मनो बुद्धिरेव च अहंकारश्चे

वारात्

त्मनो वा सुखदुःखहेतोरिति॥३॥ संसारस्य कस्य कालस्य कारणमिति कालं विदः प्रतिपेदिरे। स्व[illegible]यदृच्छेति ले
काप्रतिका नियतिर्नियमः पुण्यापुण्यलक्षणः स एव कारणमिति मीमांसकाः। सर्वज्ञत्वे पुंजीवैः संचितपुण्यापुण्य
गुणतया जगत्सर्वमीश्वरेणोत्तरकल्पात्तेन सृज्यते। किंतु बुद्धिमत्कर्तृकत्वं (पूर्व) अंतरेण यद्दृष्टमुपादानमिति
निरीश्वराः। भूतानि कारणमिति जगन्नित्यत्ववादिनः योनिः प्रकृतिं कारणमिति प्रकृतिवादिनः शाक्ताः योनिरिति
कालादिभिः प्रत्येकं संबध्यते पुरुषो हिरण्यगर्भ एव कारणमिति योगशास्त्रविदः इत्येवं संचिंता मात्र न पन्नत्व
र्थसिद्धिः। अथवा सर्व एव विश्वमेव कूटाचिद्विचिंतितं नस्सवेत्। चिंत्यं विचारणीयमिति वा एतान्पक्षान्दूषयति। संयो
ग एषां नात्विति एषां सर्वेषां कालादीनां प्रत्येकं कारणत्वं न तु एषां संयोगोपि कारणं न संभवेत् तुत्यार्थे प्रत्यक्षारणे
विरोधार्थे च वर्तते एषां कारणत्वासंभवेऽस्मिन् तो विरोधः क इत्यपेक्षायां आहात्मभावादिति। एतानात्मोपत्वेनुग्राही
त्वस्थितस्य भोक्तुरात्मनो सावोद्र तदेषां तोपत्वेन परतंत्रत्वोस्वितंत्रतया मूलकारणत्वं न संभवेत्। न हि सहैक्यो
का कारणं भवतुं ईश्वरादीनां त्वात्मापनीरादिति आत्मापि कारणं न संभवेत् कुतः जगन्निर्वाणपस्मादयमनीशः असम
र्थः। तस्यानीशत्वं कथमित्यपेक्षायामाह। सुखदुःखहेतोरिति पुण्यापुण्यवशात्त्वेन सुखदुःखहेतुतया वर्तमान
त्वात् अथवा आत्मापि जगन्निर्माणे नीशः असमर्थः कुतः सुखदुःखहेतोः सुखदुःखयोः कर्तृत्वाद्धेतोः। सर्वपक्षानिरा
कृत्य ब्रह्मविदः जगत्कारणत्वेन दृष्टवंत इत्यपेक्षायामाह। ॥ ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्नि
गूढां। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति ॥३॥ ध्यानमेव योगो ध्यानयोगो ध्यानेना
स्मितो यो योगस्तदर्थो पुरुषते लभ्यते इति वा ध्यानलक्षणयोगमनुगताः जगन्मूलकारणमपश्यन् तत्किमिति अपेक्षायामाह। देवात्मश
क्तिं देवस्य द्योतनस्वभावस्याखंडस्वादैकरसस्यात्मनोध्यासेनात्मभूतां जगदुत्पत्तिस्थितिलयकारणभूतां निर्वाच्यतया वर्तमानत्वाच्छ
क्तिरात्मशक्तिस्तां जगत्कारणत्वेनापश्यन्। तामेव पुनरपि विशिनष्टि स्वगुणैर्निगूढां इति स्वस्याः गुणाः स्वगुणाः सत्वरजस्त
मोलक्षणाः तन्मूलत्वसद्भूतस्वापकासुसंहर्तृत्यादिगुणैश्च निगूढां गुणविधुरकेवलप्रकृतिस्वरूपस्य दुष्प्रमत्वाच्चात्मनि
स्तां स्वरूपभूतां केवलचितो विकारित्वात्कारणत्वासंभवात् तदभेदाध्यासेन निवमेन तत्प्रतीत्या तस्य देवस्य सर्व ३

क ३/७५ (C)

९७८

श्रीगणेशाय नमः ॥ ॐ परिच्छेदत्रयातीतनिर्मलज्ञानमूर्तये । मनोगिरामविषयाय दक्षिणामूर्तये नमः । निगमान्तप्रदीपाय निःसंग
सुखरूपिणे । संसारतापनोदाय विद्याश्रीपतये नमः । ब्रह्मस्तम्बादिकलेवरजगत्कृत्स्नसाक्षिणे । ज्ञानोत्तममुनीन्द्राय नमः प्रसन्नकु
सुमासने । ॐ नमः परमऋषिभ्यो नमो ब्रह्मविद्यासंप्रदायकर्तृभ्यः । ॐ ब्रह्मवादिनो वदन्तीति इदं ब्राह्मणवाक्यं । वादिनो
वदनशीलाः वेदार्थविपरीतपक्षान्निर्मुक्तौ सत्यवेदार्थत्वेन ब्रह्मवदनशीलाः साक्षात्परंपरया वा सर्ववेदार्थत्वेन ब्रह्म
वदंतीति तत्सर्वे वेदा यत्पदमामनंतीति श्रुतेः । इममेव ब्राह्मणवाक्यार्थं जोपनिषत्समाप्तेरुत्तरे मंत्राः प्रतिपादयति ॥ ॥
॥ किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठाः । अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थां ॥१॥ किं
कारणं ब्रह्म जगदुपादानकारणं ब्रह्म किमन्यज्जगदुपादानकारणं ब्रह्म कीदृशं श्रुतिविद्याभिर्लिखितं वा अथवा ब्रह्म किंका
रणमविशेषण निमित्तोपादानं वा । आहोस्वित् निमित्तकारणमेव । कुतः स्म जाता आकाशादिवत्स्थित्यवस्था यां ब्रह्मका
र्यत्वाः संतः सुषुप्तिप्रलयादिरूपादानकारणं ब्रह्ममात्रतया विलयं गताः संतः प्रबोधसर्गादिसमये उपादानकारणाद्
ब्रह्मणः कार्यत्वेन वयं जाताः आहोस्वित् उत्पत्तिस्थानीया घटाकाशस्थानीया यथा वयं सुषुप्ति प्रलयादिरूपाधिविलये बिंब
वंद्महाकाशस्थानीयब्रह्मणो कामुपागताः प्रबोधसृष्ट्यादिसमये ब्रह्मविवर्तकार्यकारणादिम नो न हाकाशस्थानीय
ब्रह्मणः सकाशात् जाताः जीवाम केन लब्धेन कोटिजीवामः केन वयं जीवामः अदृष्टेन किमीश्वरेण वोभयेनाहोस्वित्स्वभावे
न । क्व च संप्रतिष्ठा मोक्षावस्थायां अस्माकं विकारत्वे ब्रह्मणि किमेकत्वेनावस्थानं उत तस्य तोऽविकारित्वेन मायामिलित्वे
न विकारित्वे ब्रह्मण्येकत्वेनावस्थानं माहोस्वित् द्विविधो मायोपाधिरूपा ब्रह्ममात्रतया प्रविलाप्य विशुद्धे ब्रह्मण्येकत्वेनावस्था
नं क्व च संप्रतिष्ठा इत्यस्मिन्पाठे मोक्षावस्थायां कीदृग्रूपे ब्रह्मणि वयं एकत्वेनावस्थिता इति योजयितव्यं अधिष्ठिताः केन किं
वयं केवलादिष्टाधिष्ठिता इति अधिष्ठिताः संतः सुखेतरेषु सुखदुःखेषु परवशत्वेन वर्तामहे आहोस्विदीश्वरेणोभयेन स्व
भावेन ब्रह्मविदो हे ब्रह्मविदः वयं व्यवस्थां विनिर्णयं समहविचारं सकुर्यामेति । ब्रह्मकारणविपरीतकारणपक्षानुक्रमेणो
पन्यस्य दूषयति । । कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यं । संयोग एषां न त्वात्मभावादात्मा

पंचबुद्ध्यादिमूलां । पंचावर्तां पंचदुःखौघवेगां पंचाशद्भेदां पंचपर्वामधीमेति ॥५॥ पंचस्रोतोंबुं पंचस्रोतोरूपेणाविष
देन विविधवेगवर्तीं तरंगितचक्षुरादीनि पंच बुद्धीन्द्रियाणि स्रोतांसि तान्यंबुस्थानीयानि यस्यास्तां पंचस्रोतोंबुं पंचयोन्युग्रवक्रां
गीतास्वरूप्रसस्यष्टकं । भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च । अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा । ब्रह्मा प्रजापतिर्देवा गंधर्वयक्षराक्षसाः । पितरश्च पिशाचाश्च देवाष्टकमुदाहृतमिति । भव
शर्व ईशान रुद्र पशुपति उग्र भीम महादेवस्य मूर्त्यष्टकं । एतैः षड्भिरष्टकैरुपलक्षितसमाहारकं प्रत्ययः धि
श्वरूपैकपाशं विश्वरूपतया विवर्तत इति विश्वरूपकामः स एवैकः प्रधानः पाशः पाशरूपेण बध्यते सर्वं येन पाशाः स
योमार्गभेदा यस्य तं त्रिमार्गभेदं अर्चिरादिमार्गस्यैको धूमादिमार्ग एको ज्ञाय स्व मृत्यु पश्चेस्य धोमार्ग एकः एतत्र
यमोह अनात्मन्यात्माभिमानलक्षणो यस्य तं द्विनिमित्तैकमोहं द्वयोः पुण्यपापयोस्तावदलक्षरागद्वेषयोश्च निमित्तकारणं देये कं सप्त
तरमंत्राद्युक्तरूपतेवो मामायाधीनत्वात्तद्विवर्तं सर्वाधिष्ठानत्वेन सर्वात्मकमात्मानं पूर्वमंत्रेण चक्ररूपेण निरू
पितमुत्तरो मंत्रो नदीरूपेण निरूपयतीति निरंतरां वेरभ्यहनोः । । पंचस्रोतोंबुं पंचयोन्युग्रवक्रां पंचप्राणोर्मिं आत्मा द
पः पंचवायवः ऊर्मिस्थानीया यस्यास्तां पंचबुद्ध्यादिमूलां बुद्धीनामादिभूतानि कारणानि रूपाणि वस्तुगतदिशा
नेंद्रियाणि तेषां सर्वविज्ञानशक्तिमहदहंकारः स एव संसारस्य मूलं यस्याः सा आद्यवावर्तां आकाशादीनि पंच महद
र्तासुखाः उत्तरोत्तरमेकैकाधिकशब्दादिगुणान्यावर्तस्थानीयानि यस्यास्तां । पंचदुःखौघवेगां गर्भजन्मव्याधिज
राद्रे होपंचाक्षराक्षरसते दयस्यास्तां । पंचाशद्भेदां सर्वचेवा त्वाविस्फुटद्यते । पंचपर्वां तमो मोहो महामोहस्तामिस्रोंऽध
तामिस्र इति पुराणसिद्धसिद्धपर्वाणि यस्यास्तां । ईश्वरांतर्यामिसूत्रहिरण्यगर्भविराट्पानि पर्वाणि यायस्यास्तामे
वंरूतां नदीमधीम इति पूर्वोक्तेषु विकल्पेषु प्रत्येकं संबध्यते किं कारणं ब्रह्मेत्यस्य प्रश्नस्य परिहारं वक्तुमुत्तरे मंत्राः प्रक्रमंते । । सर्वाजीवे सर्वसंस्थे बृहंते तस्मिन्हंसो भ्राम्यते ब्रह्मचक्रे । पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ॥६॥ सर्वाजीवे रजे तादीनां ... कथा दिवद
पंचयोनयः पंचतन्मात्राः एव उग्राणि वक्राणि प्रवाहगतसंनिवेशविशेष वक्रं तानि यस्यास्तां पंचयोन्युग्रवक्रां पंच
प्राणोर्मिं

२

~~संयुक्तमेतत्~~ उद्गीतमेतत् उत्कृष्टमुपरि वेदांतेषु गीतं प्रतिपादितं एतत्स्वरूपं ब्रह्म उद्गीथमित्येके पठंति तस्मिन्पक्षेप्येवमर्थः
अथवा उत्कृष्टउपरि साध्यसाधनरूपात्सर्वस्मादुपरि गीतं कार्यकारणात्मकसर्वप्रपंचशून्यत्वेन प्रतिपादितमित्यर्थः अतएव परमं
वस्तु परममनुत्कृष्टं तुर्याख्यं ब्रह्म तद्भवति। सांख्यपक्षाद्या इति माह तस्मिन्निति तस्मिन्निष्कलेऽसंगेऽविकारेऽनंते सुखस
च्चिन्मात्रैकरसे आत्मनि त्रयं सत्यरज्ज्वात्मन आत्माख्यं ब्रह्मविष्णुशिवाख्यं जाग्रत्स्वप्नसुषुप्त्याख्यं लोकत्रयाख्यं विश्वतैजस
प्राज्ञाख्यं यत्तत्सर्वं रज्ज्वादिषु सर्पादिरिव वर्त्तते स्वे प्रतिष्ठा स्वस्मिन्नेकस्मिन्नस्याहिरण्यगर्भजगत्प्रमुखदेवेन भावेनात्मकस्य
स्वरूपप्रदत्या सुप्रतिष्ठा आनंदस्फुरणप्रदत्वाद्यस्य प्रतिष्ठा तारं ब्रह्मस्वयमेवाप्रत्यगभिन्नमिति कृत्वा द्क्षरं चाक्षरं। नक्षरती
तिवा अक्षरं अत्रांतरं ब्रह्मादिपिपीलिकांतेव्यष्टिसमष्ट्यात्मकत्वेन व्यवस्थिते संसारचक्रे आंतरं सर्पव्याघ्रादौ रज्ज्वादि
रिवांतरं सत्यसुखापरोक्षस्वभावमात्मानं वेदविदो यथावद्वेदनोक्तितात्पर्यविदो विदित्वा अपरोक्षीकृत्य नतुरादेहे
न्द्रियादावात्माभिमानं हित्वा निरतिशयपुरुषार्थरूपे ब्रह्मणि सदात्माभिमानाः संतस्तस्मिन्नेव ब्रह्मणि लीनाएकीभू
ताः स्युः ऽन्वय इष्टार्थं श्रुतिः स्वयमेव दर्शयति योनिमुक्ता इति। मुमुक्षुस्वरूपब्रह्मानंदस्य व्यवधायकमायाभिरहि
तैव ब्रह्मणि स्थितिः प्राप्तिश्चापि सैवेत्यर्थः अथ स्वाद्वितीयरूपेण सर्वस्यात्मन्यध्यस्तत्वं मोक्षप्रकारं चोक्त्वेदानीं कार्यकारणरूपेण
सर्वस्यात्मन्यध्यस्तत्वमात्मनः संसारित्वप्रकारं मोक्षप्रकारं च दर्शयति। ।संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते वि
श्वमीशः। अनीशश्चात्मा बध्यते भोक्तृभावाज्ज्ञात्वा देवं मुच्यते सर्वपाशैः ।८। ।संयुक्तं कार्यकारणत्वेन संयुक्तं क्षरं तं क्षरतीति क्ष
रं आकाशादि। अक्षरं न क्षरतीत्यक्षरं मायाप्रकृतिः महाप्रलयादावपि स्थितत्वात् व्यक्ताव्यक्तं अभिव्यक्तिनामरूपावस्था
पन्नमाकाशादि व्यक्तमनभिव्यक्तनामरूपबीजावस्था प्रकृतिरव्यक्तं एतत्कार्यकारणरूपेण वर्त्तमानमिदं विश्वं यत्सर्वं स
च्चिदानंदैकरसवपुरीश्वरः स्वरूपानंदस्फुरणप्रदतया भरते बिभर्त्ति अनीशश्चात्मा सुखस्वसंवित्स्वरूप ईश आत्मा माया ३
धिष्ठानत्वेन मायाया अधीनत्वात्तद्विलसितद्वैतस्य माछादितत्वाज्ज्ञानीशश्च भवति अनीशो अज्ञानस्वभाव इत्यर्थः स्वरूपस्या
नवबोधाद्बध्यते भोक्तृत्वलायाद्विज्ञानविक्षेपक्रियाशक्तिमद्रूपोहंकारो भोक्ता भोक्तृत्वात् बुद्धिगतप्रपंचसुखदुःखादिक

त्रीहिंकारे त्वैक्याध्यासलक्षणात् भोक्तृभावात्तद्धर्मान्कर्तृत्वभोक्तृत्वसुखदुःखादीन् स्वधर्मत्वेन स्वीकृत्याहं कर्त्ता भोक्ता सुखी
दुःखीति बुध्यते। अनेकजन्मानुष्ठितनित्यनैमित्तिकजनिततत्पुण्यनिकरैः प्रक्षीणपापस्य शुद्धांतःकरणस्येश्वराराधनबु
द्ध्या सर्वकर्मानुष्ठानसमुपजायदीश्वरसमाराधनबुद्ध्यानुष्ठितकर्माहितपुण्यनिचयैरीश्वरध्यानेच्छा समुपजायते ईश्वरध्या
नाहितमहत्तरपुण्येन सर्वकर्मसन्यासविध्यनुष्ठानेच्छा समुपजायते। सर्वकर्मसन्यासानुष्ठानजनितमहत्तरपुण्येन श
मदमादिविध्यनुष्ठानेच्छा समुपजायते। शमादमाद्यनुष्ठानजनितमहत्तरपुण्यैः श्रवणमनननिदिध्यासनविध्यनुष्ठाने
च्छा समुपजायते एवमनेकजन्मानुष्ठितपुण्यपरंपराभिर्विधयप्रक्षीणाशेषपापोपास्तरजस्तमोमलो योग्याधिकारी मुमु
क्षुः तत्त्वदर्शिनं परमकारुणिकं गुरुं प्राप्य तत्सन्निधौ तच्छुश्रूषया ब्रह्मचर्याद्यनुगृहीतश्रवणमनननिदिध्यासनानि से
व्यमानस्य मनननिदिध्यासनानुगृहीतश्रुतमहावाक्यादहं ब्रह्मास्मीति देवं ज्ञात्वा साक्षादपरोक्षीकृत्य मुच्यते सर्वपाशैः
पाश्यते बध्यते येनेति कार्यकरणतद्धर्मलक्षणैः पाशैः सर्वैर्मुच्यते। ज्ञानेन सर्वसंसारपाशबीजाज्ञानतमसच्छिन्नमात्रे
तयादाहात्तन्मूलं सर्वं छिन्नमात्रतया लीनेनस्यतीत्यर्थः। चेतनोप्येकः प्रकृतिश्चैकाच्चेदयं जीवोपरः जीवः किंचिद्ज्ञः क्षे
त्रज्ञः परः सर्वज्ञो जीवो नियम्यः परमात्मा नियंता जीवः संसारदुःखकलुषितः सर्वसंसारधर्मविनिर्मुक्तः परमात्मेत्यादिवि
रुद्धधर्मव्यवहारः कथं सेत्स्यतीत्याशंक्योपाधिभेदेन मायाकल्पितत्वात् तद्भेदात्सर्वव्यवस्था सिद्ध्यतीत्याह। ज्ञाज्ञौ द्वा
वजावीशानीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता। अनंतश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विंदते ब्रह्ममेतत्॥९॥ यथा
बिंबप्रतिबिंबादिसर्वव्यवहारानास्कंदितैकमपरस्य स्वच्छोदके चाचावोपाधौ संपृक्ते तत्संपर्कात्तद्भेदादिदं बिंबमिदं प्र
तिबिंबं बिंबस्तत्त्वेन गुरुस्थः सविताचलनगमनपरिच्छेदादिधर्मरहितः तदुदकपात्रस्थः प्रतिबिंबस्य परिच्छेदचलनगम
नादिधर्मभागित्यादिविरुद्धव्यवहारास्कंदितत्वं दृश्यते तद्वदत्रापि कथं ज्ञाज्ञौ द्वौ बिंबस्थानीय ईश्वरो ज्ञः सर्वज्ञः प्रतिबिंबस्था
नीयो जीवोऽज्ञः किंचिज्ज्ञः औपाधिकबिंबप्रतिबिंबभेदो प्यनादिसिद्ध इत्युत आह अजाविति अजौ जन्मरहितौ ईशानीशौ बिं
बस्थानीयः परमात्मेशो नियंता। अविद्योपहितः प्रति बिंबस्थानीयोऽनीशोऽनीश्वरः कृत्स्नत्वं छांदसं सुषुप्तिप्रलयादौ बु

ने
पाधेरस्वाभाव्यात्तत्र निबंधनत्वेन जीवपरस्त्वागो न संभवेदतः स्वाभाविकत्वेन जीवपरभागो णीकर्त्तव्यः सुषस्यादाव
प्रविघमानोपाधिसंबंधोपि उपाधेरानंत्यात्तन्निबंधनं जीयान्यैस्य मप्येष्टव्यमित्याशंक्याह अजा ह्येका भोक्तृभोगार्थयुक्ते
प्ति अज्ञानं ज्ञापते इत्यजा । एकारश्चेवकारार्थे भोक्तुः प्रतिबिंबस्थानीयस्य जीवस्य दर्पणस्थानीया प्रकृतिः भोगादिधर्मापादकत्वे
न स्वयं मुख्यभोगादिधर्मवती स्थिता । चंद्रचलनादिधर्मापादकत्वेन स्वयं मुख्यचलनादिधर्मभ्रान्ते न स्थितोदकवधकत्को
चिदात्मन्यध्यस्ता चेत्यर्थः । मायोपाधिसंपर्कनिबंधनभेदादिकल्पना यस्मिन्न विकारे नं ने सत्यसुखसंविन्मात्रआत्मनि सोप्यसं
गसत्ये सुखापरोक्षस्वभावतया सदा विद्यत एव संसारकल्पितत्वे घटाद्युपाधिसंपर्कतत्वेतत्तेदादिविरूपधर्मादिकल्पनायास्मि
न्नाकाशादिमात्रे सोपि अहाकाशादिर्विधत्ते एव यथा तद्वदित्याहानं तु इति अनंतो द्वितीय आत्मा निरुपाधिकस्वरूपः विश्वरूपः स
र्वकल्पनाधिष्ठानतया विश्वरूपः अकर्त्ता अविकारी हि यस्माद्विधत्ते तस्मात्त्रयं बिंबस्थानीयं परमात्मानं प्रतिबिंबस्थानीयं जीवं द
र्पणाद्युपाधिस्थानीयां मायां प्रकृतिं च एतत्त्रयं । यदा सम्यग्दर्शनावस्थायां ब्रह्म विंदते सत्यसुखं चिन्मात्रं ब्रह्ममात्रतया विंदते तेरुस
तं मुमुक्षुस्तदा निर्धूतनिखिलविकल्पपूर्णानंदाद्वितीयब्रह्ममुक्तात्मा तत्र कर्तृत्वादिसकलसंसारधर्मविवर्जितो वीतमोहः कृतकृत्यो
भवतिष्ठते इति वाक्यशेषः । ब्रह्ममिति छांदसं ब्रह्मेत्यावत्त । जीवेश्वरप्रकृतीनामनादित्वं प्रकृतिसंपर्कवशात्सर्वज्ञत्वादि प्यवस्तो
जीवेश्वरप्रकृत्यात्मकद्वैतजातस्यानिर्वृत्तात्रोपि विकल्पसत्यसुखसंविन्मात्रतया सम्यग्ज्ञानेन प्रविलयं चोपपाद्येदानीं प्रक
तेरनित्यतां पुरुषस्य नित्यतामुभयोरीश्वरेण नियम्यतां तद्देकत्वज्ञानाज्जीवस्य मोक्षं च दर्शयति । क्षरं प्रधानममृताक्षरं ह
रः क्षरात्मानावीशते देव एकः । तस्याभिध्यानाद्योजनात्तत्त्वभावाद्भूयश्चांते विश्वमायानिवृत्तिरिति ॥१०॥ क्षरं प्रधानं क्षरती
ति क्षरं प्रधानं वियत्सु मुखे सर्वमस्मिन् विवर्त्तते प्रतिधीयत इति प्रधानं । अनादेः स्वतो नाशयत्याभावात्पूर्वमंत्रे नादित्वे ४
नोक्तायाः प्रकृतेरनित्यत्वोक्त्या सद्द्वैतलक्षणं यत्सिद्धं । सर्वत्र सम्यग्ज्ञानं विना प्रकृतेर्नाशयत्यायोग्यतां विवक्षितां क्षरमिति निर्त्य
त्वमुक्तं अत्र सम्यग्ज्ञानेन नाशयत्वयोग्यतां विवक्षित्वाक्षरमित्यनित्यत्वमुच्यते । अमृताक्षरं अमृतं च तदक्षरं चेत्यमृताक्षरं
र असंगत्वात्प्राणवियोगलक्षणा मृतिर्नास्ति । साक्षित्वात्स्वरूपनाशोपि न भवतीत्यमृताक्षरं पुरुषस्वरूपं हरः अद्वि
तीयत्वात्स्वेन नित्यपरिपीडितद्वैतजातत्वात्सम्यग्ज्ञानफलकाले प्रतिभासमात्रशरीरद्वैतजातं तन्मूलाविद्यां यस्वताय

न्मात्रतया हरतीति हरः क्षरात्मानौ क्षरं सर्वकार्यां प्रकृतिं आत्मानं स्वप्रतिबिंबजीवाख्यं पुरुषरूपं चेशते ईष्टे प्रकृतेः स्वरूपस्फु
रणप्रदत्वेनाधिष्ठानत्वेन घटाकाशस्थानीयात्मा प्रतिबिंबस्थानीयानां जीवानां निरुपाधिकचिन्मात्ररूपेण निर्वदत्यादी
श इत्यभिसंधीयते देवश्चिदेकरसः एक अद्वितीयस्तस्य देवस्याभिध्यानात् सुरनुरतिर्योगादि प्रवेशे घाकाशादि प्रसंदेषु वस
स्तुस्वरूपप्रदतया कारणत्वेनानंदप्रदतया पोषकत्वेन स्फुरणप्रदतया साक्षित्वेन वर्तत इत्यभिनतो ध्यानात् कार्यकरणसंघात
साक्षिभूतोहंसएवास्मि इति योजनात् तत्त्वभावाद्वैतभ्रमतन्मूलाविद्यातिरोहितनिरतिशयानंदमोक्षपुरुषार्थस्वरूपब्रह्मतत्त्वस्य
व्यवधायकद्वैतभ्रमस्य तन्मूलाविद्यायाश्च विघयादाहान्मुमुक्षोः स्वरूपत्वेनभावादाधिर्ज्ञावा इत्यूर्ध्वो इत्यतादिहेतुभिर्द्वैतस्यज्ञान
बाध्यत्वोन्यत्वलक्षणमिथ्यात्वप्रसाधनादात्मनोऽद्वयत्वनिर्णये न द्वैतास्कंदिता परमार्थत्वेच कल्प्यनोपास्तिहेतुभूतायाश्च दाहः एवं
स्वयोः ब्रह्मलैकत्वापरोक्षे कल्पो घाछादिकाविद्यातमः साधारणार्थक्रियासमर्थत्वेनाकाशादिद्वैतभ्रमक्रमायायाश्च दाहः अंत
प्रारब्धकर्मातद्वैतप्रतिभासमात्रनिर्वाहिकमायालेशस्याप्यप्रतिबद्धशक्तिविघयानिवृत्तिः इत्थं विश्वमाया निवृत्तिर्विदुषो भवतीति
ब्रह्मात्मैकत्वदर्शिनो मोक्षपुरुषार्थसिद्धिप्रकारमाह ॥ ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः । तस्याभि
ध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम इति ॥ ज्ञात्वा देवं प्रकृतं देवमात्मत्वेन ज्ञात्वापरोक्षीकृत्य सर्वपाशापहानिः
पाशयतेबध्यतेऽनेनेति रागद्वेषपुण्यापुण्यादिलक्षणः सर्वसंसारहेतुः पाशस्तस्य सर्वस्यापहानिर्दाहः विद्ययाविघयादाहे
तन्मूलरागद्वेषदाहे तन्मूलविहितप्रतिषिद्धक्रियादाहः क्रियादाहे तन्मूलपुण्यपापलक्षणसर्वदाहः अपूर्वदाहे तन्निमित्तश
रीरांतरं नप्रतिपद्यत एवेति शारीरसंबंधनिमित्तैः सुखदुःखेनानुबध्यते इत्युक्तं क्षीणैः क्लेशैः सम्यग्ज्ञानेन दग्धैः क्लेशरूप
लक्षितस्य ज्ञानिनो जन्ममृत्युप्रहाणिः । ब्रह्मात्मैकत्वदर्शनादात्मनि जन्मांतरे वानुष्ठितस्य सर्वदा हानिर्निमित्ताभावात्तन्निमि
त्तशरीरांतरपरिग्रहलक्षणजन्मप्रहाणिः अत एव तत्प्रतियोगिलक्षणमृत्युप्रहाणिः सम्यग्ज्ञानात्स्वबीजस्य संसारदुःखस्य
दाहमुपपाद्येदानीं तस्यैव विदुषः स्वरूपानंदाविर्भावलक्षणमोक्षपुरुषार्थसिद्धिमाह तस्येति तस्य प्रकृतस्य देवस्याभिध्या
नादात्मसुखेनात्मत्वेन ध्यानाद्देहभेदे आच्छादिकाविद्यातत्कार्यलक्षणोपाधिभेदे दाहे तृतीयं विश्वैश्वर्यमाविर्भूतं भवति किं च क
कर्मणा धूमादिमार्गेण प्राप्तव्यं चंद्रलोकैश्वर्यमुपासनेनार्चिरादिमार्गेण प्राप्यं ब्रह्मलोकैश्वर्यं परं तदपेक्षया तृतीयं
केवलः सम्यग्ज्ञानेन कृत्स्नकर्ममार्गनिरपेक्षमोक्षैश्वर्यमाविर्भूतं सर्वदिस्य यः सकारणसंसारदुःखनिवृत्तिलक्षणं निरतिशा

यानंदाभिव्यक्तिलक्षणं च मोक्षमुपपादयन्तदुपायं संक्षिप्य दर्शयति केवल आप्तकाम इति केवलः विषयादर्शाविघातकार्य
शेषसंसारदुःखनपाप्तकामः काम्यंत इति कामाः आनंदाः सर्वे कामाः आत्मतया आप्ता अस्येत्याप्तकामः एतस्यैवानंदस्येति
श्रुत्येतरात्स्वरूपस्तरब्रह्मानंदाविर्भावात्तिरस्कार्यविघातकसंसारदुःखं। च विषयास्वरूपमात्रेण तपारम्याद्यासर्णानंदब्रह्मस्व
रूपोवतिष्ठते विद्वानित्यर्थः आत्मतत्त्वस्यैवाज्ञातत्वसंभवात्सर्वप्रमाणप्रमेयतानिरतिशयपुरुषार्थत्वाच्चोपनिषत्प्रमेयतां नि
रतिशयपुरुषार्थत्वाच्चोपनिषत्प्रमेयतां चेतरस्या संभावितो ज्ञानत्वात्स्वप्रकाशत्वात्प्रमेयत्वम पुरुषार्थरूपत्वाच्चेत्तेद्यतिपाद्यत्वो
पावं च ऊवेश्वरादि प्रश्नेदस्यति मात्रतो चाह। ।एतद्रूपं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित्। भोक्ता भोग्यं
प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्॥ एतत्प्रकृतं ब्रह्म ज्ञेयं ज्ञातुं हि स्वयंप्रकाशसुखसंवेदनत्वादसंभाविताज्ञान
त्वात्पुरुषार्थरूपत्वाच्च नित्यमेव सर्वप्रमाणैर्ज्ञेयं तद्देवात्मसंस्थं आत्मभावत्वेन नित्यमेव सदा सम्यक् स्थितं। अथवा आ
त्मनि कार्यकारणसंघाते बुद्धौ वा सम्यक् स्थितं प्रत्यक्तेन स्थितमित्यर्थः। नातः परं अतः आत्मतत्त्वात्परं अन्यन्न वेदित
व्यं सम्यक् वेदनार्हं नास्त्येति द्वयपादृगन्येति प्रमाणज्ञानेन प्रतियोगित्वेन द्वयपादिरूपत्वमंगीकर्तव्यमित्याशंक्य
ने दृष्टान्तस्य प्रमाणज्ञानत्वाभावात्प्रमाणवेद्यत्वे ऽरुस्य नांगीकर्तव्यं केनापि प्रकारेणेत्याह किंचिदिति अनात्मवस्तुनो
जडत्वे न हेयत्वादसंभाविताज्ञानत्वाद्बुद्धेयत्वासंभवो यस्मात्तस्मादात्मतत्त्वमेव सदा ज्ञेयं भोक्ता भोक्तारं द्वितीयार्थे प्रथ
मा कार्योपाधिके घटाकाशस्थानीयं जीवं भोग्यं दृश्यजातं प्रेरितारं कारणोपाधिकमीश्वरं च मत्वा इमं प्रश्नेदमविद्याम
यमेवेति मत्वा तर्केपि तावत्सर्वं मात्रैकत्वादि प्रश्ने दृरूपं त्रिविधं एतत्प्रकृतं ब्रह्मेति स्थाणुपुरुषन्यायेन प्रोक्तं प्रकर्षेणोक्तं
तात्पर्येणोक्तं वेदान्तेषु। अथवा भोक्ता भोग्यं प्रेरितारं प्रथमार्थे द्वितीया एतत्त्रिविधं सर्वमस्मिन् शास्त्रे प्रोक्तं तात्प
र्येणोक्तं ब्रह्मेति मत्वा भोक्ता अशेषभेदप्रपंचप्रविलापनेन निर्विशेषं ब्रह्म मत्वा बुद्ध्वा कृतकृत्यो भवतीति वाक्यशे ५
षः। स महिम्यप्रतिष्ठा सकलकार्यकरणादिषु निरतिशयानंदात्मतत्त्वस्य गूढतया विद्यमानोऽपारस्य साधनेन स्वरूप म
पा अभिव्यक्तितो वह द्रष्टान्तेनोपपादयति। ।।वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिंगनाशः। स भूय एव

एवं इंधनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देह इति ॥१३॥ वह्नेः सर्वगतस्य अरण्यादिकाष्ठगतस्य मूर्तिः स्वरूपं स्वेन
दाहकोऽग्न्यारण्यादिकाष्ठतिरस्कारात् यथा न दृश्यते । विद्यमानस्यैव तिरस्कारादनुपलभ्यमानत्वं कस्मात् अविद्यमान
त्वादेवानुपलभ्यमानत्वं कस्मान्न भवतीति चोदिते आह नैव च लिंगनाश इति अरण्यादौ वह्निसंज्ञावस्य लिंगा सा
वएतदेवं स्यान्नैव च लिंगनाशः लिंगस्य विद्यमानत्वात् किं तच्छुष्का श्वत्थ ज्ञातीपत्यादि । अत एव तदेव मथ्यते न
यल्किंचिदेवमनु तत्र वह्निर्गूढतया विद्यमानत्वात् तदेव मथ्यते किंतु तस्यैव वह्निजननशक्तिमत्वात् देव मथ्यते
इति वचनत्वादपि वह्निसंज्ञावांगीकर्तव्यः शक्तिसंबंधेन वह्निसंज्ञावत्स्पष्टव्यत्वात् । ज्वलपादो कार्यकारणमात्र तपा
सीदिति श्रुतिवाते: प्रतिपादितत्वाच्च स स्वरूपत्वेवं इंधनयोनिगृह्यमन्थनात् प्रज्ञालितावपवैस्ति स्फुरत्त्वेन विद्यमान
एव वह्निर्लब्धोत्सवो मथनादिंधनयोनिरिंधनमेव योनिरिंधनयोनि स्तस्मिन् यो नोऽग्राकूस्य तिरस्कारक काष्ठ
हकत्वेन गृह्यः गृह्यते उपलभ्यते अग्न्यसित्वके धूमादिलिंगं न न्हस्यते यथा तद्वोभयं वै प्रणवेन देहे तद्वा तदुस
पमिव चात्राध्वउपमानार्थः दार्ष्टांतिकेपि स्वगतह्यमायागकार्यतिरस्कृतत्वे न विद्यमानसत्यसुखस्तचिन्मात्र
लस्वरूपं तिष्ठति तत्संज्ञाचे साक्षित्वनित्यत्वप्रेमास्पदत्वानि लिंगानि च तद्वत्तयं सम्यग्ज्ञानात्प्रागपि विद्यते प्रणवेन
प्रणवाख्यसाधनजनितब्रह्मात्मैकत्वविद्यया एवं स्वतिरस्कारकाविद्यातत्कार्य दाहाद्देहे कार्यकरणसंघा
ते अरणिस्थानीये आत्मनत्यादि व्यक्तिस्तद्वर्तित्व्यक्तोरमानित्यादि लिंगं चोभयं विद्वत्सु गृह्यते । सम्यग्ज्ञाना
प्रागास्तत्वतिरस्कारकं कार्यकारणसंघातस्यात्मा व्यक्तिस्थानस्यात्मनत्यासित्वके उत्कृष्टसाधनप्रणव
स्यांतरं वा साधनं निदिध्यासनस्य वाधाराव रण्यादिरूपं निरूपयति । । स्वदेहमरणिं कृत्वा प्रणवं चोत्तरा
रणिं । ध्याननिर्मथनाभ्यासाद्देवं पश्येन्निगूढवदिति ॥१४॥ स्वस्यात्मतत्वस्य तिरस्कारकाविद्यातत्कार्यकरण
संघातलक्षणं देहमधरारणिं कृत्वा आत्मतत्वाभिव्यक्तिस्थानं कृत्वा प्रणवं च वेदसारमुत्तरारणिं कृत्वा

सम्यग्ज्ञानकरणत्वेन स्वीकृत्य ध्याननिर्मथनाभ्यासात् ध्यानं निदिध्यासनं तदेव निर्मथनं तस्याभ्यासात् देवं द्योत
नस्वभावमसुखसंविद्रूपमात्मानं पश्येद् पश्येत्साक्षीकुर्यात् ज्ञानीकारवनिगूढवत् पिण्डादिसंचितं महानिधिमज्ञानिरिका ना
लप्रासंज्ञानेन यथा पश्येत् तितक्षुर्मुमुक्षुः सम्यग्ज्ञानेनात्मतत्त्वं पञ्चभूतकार्यकरणसंघाते प्रत्यक्त्वेनैवात्मदर्शनं न तु तट
स्थत्वेन परोक्षतयात्मदर्शनं सर्वदेति दृष्टांतेनाह ॥१४॥ ।तिलेषु तैलं दधनीव सर्पिरापः स्रोतःस्वरणीषु चाग्निः । ए
वमात्मात्मनि गृह्यतेसौ सत्येनैनं तपसा यो नुपश्यति ॥ तिलेषु तैलं तिलेषु तिरस्कृततया वर्त्तमानं तैलं यंत्रनिष्पीडनेना
भिव्यक्तेः सर्वत्र तिरस्कृतत्वेन वर्त्तमानात्मतत्त्वाभिव्यक्तेरुदाहरणं दधनीव सर्पिः दधिनि मंथनेनाभिव्यक्तं नव
नीतं सगुणब्रह्मस्थानीयं नवनीते अग्निसंपर्कविलयात्सुगं[illegible]पापुरुषार्थत्वेनाभिव्यक्तं घृतं निर्गुणब्रह्माभि
व्यक्तेरुदाहरणं । आपः स्रोतःसु शुष्कासु नदीषु खननाभिव्यक्ता आपस्तापोपशमनकारणरूपा आत्मतत्त्वाभिव्य
क्तेः सर्वसंसारतापोपशम नहेतुत्वे उदाहरणं अरणीषु चाग्निः स्वदाह्यारणीषु तिरस्कृतत्वेन व्याप्य स्थितो मथ
नेन स्वतिरस्कारककाष्ठादिदाहकत्वेनाभिव्यक्तोग्निर्मायातत्कार्यतिरस्कृतात्मतत्त्वस्य मथनस्थानीयात्मदर्श
नेन तिरस्कारकदाहकत्वेनाभिव्यक्तौ दृष्टांतः दधनीवेत्यत्रेव शब्दः प्रत्येकं संबध्यते । एवमात्मात्मनि गृह्यतेसौ एवं यथा
यं दृष्टांतस्तथात्मा । यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य संततो भावस्तस्मादात्मेति गीयते । आत्मनि देहेंद्रि
यसंघाते तत्रापि बुद्धावेव गृह्यते अभिव्यज्यते श्रवणादिभिः सत्येन सत्यवदनेन सत्यशब्दोपलक्षितयमकलापेन तथा
एनं प्रकृतं स्वमात्मानं तपसा बाह्यांतःकरणनिरोधलक्षणेन मनसश्चेंद्रियाणां चैकाग्र्यं परमं तप इति स्मृतेः । तत्त्वंपदार्थ
साधनं अनुसृत्य पश्यत्यपरोक्षीकरोति यो मुमुक्षुरसौ सम्यग्दर्शी स्वमात्मानमात्मनि देहेंद्रियादिसंघाते सम्यग्ज्ञानेन प्रमे ९
यतया ॥ गृह्यत इति प्रमेयज्ञत्रैक्यं दर्शितं ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेदिति श्रुत्यंतरादात्मा स्वेन स्वयमे
व गृह्यत इत्यर्थः मोक्षस्य साधनात्मविद्यासाधनतपसोः परमात्मैव निमित्तं ता

स्यामसिव्यक्तश्च सप्तवेति दर्शयित्वा प्रकरणार्थं ग्रोपसंहरति। ।सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितं। आत्मविद्या
तपोमूलं तद्ब्रह्मोपनिषत्परं तद्ब्रह्मोपनिषत्परमिति।१६। सर्वव्यापिनमध्यात्मादिभेदभिन्नं जगदंतर्बहिश्च व्याप्य स्थितं आ
त्मानं अतएवात्मशब्दार्थभूतं क्षीरे सर्पिरिवार्पितं सर्वस्यात्मत्वेनार्पितं स्थितं। आत्मविद्यातपोमूलं आत्मविद्यातपसी मू
लं निमित्तं आत्मविद्यातपसी यस्य मूले अस्मिन्नंतर्यके तदात्मविद्यातपोमूलमिति वा तद्ब्रह्म तत्त्वशब्दार्थभूतं ब्रह्मादिती
यमुपनिषत्कृत्य उप आत्मतत्वेन निषण्णं अविद्यातत्कार्यं द्वैतस्यैवं वसम्यग्ज्ञानफलं कारणं सतस्त्यक्तावता यस्मान्न
तयादग्धा प्रत्यक्त्वेनावस्थितमित्यर्थः परं च कृष्टं निरतिशयानंदतया चिन्तितं विद्यादिसंध्याहारः द्विर्वचनमाद्ध्या
यमध्यायपरिसमाप्तिद्योतनार्थं च। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्ज्ञानोत्तमपूज्यपादशिष्यस्य विज्ञा
नात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे प्रथमोध्यायः।१।। परमात्मनस्तपोविद्यामूलत्वमुक्तं तदेवोप
पाद्यं तदुत्तरैः केचिन्मंत्राः प्रथमं ध्यानांतःकरणनिरोधलक्षणतपोनिमित्तत्वमीश्वरस्याह। ।युंजानः प्रथमं मनस्त
त्वा सविता धियः। अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरदिति।१। युंजानः योजयन् अंतर्णीतं मिदं प्रथमं समाधु
प्रक्रमसमये किं मनः परमात्मनि योजयन् सविता अध्यात्मादिभेदभिन्नप्रपंचप्रसवगुणयुक्तः परमेश्वरः किमर्थं तत्त्वा
य आत्मतत्वापरोक्ष्याय धियः मनोविक्षेपहेतुभूता ज्ञानेंद्रियाण्यासुरवृत्तिभ्यो विच्छिद्य सात्विकवृत्तिषु तिः संयोजयंतः
अग्नेर्ज्योतिरग्नेरित्युपलक्षणं अग्न्यादि सर्वज्योतिषां ज्योतिः तद्धि ज्योतिषां ज्योतिरिति श्रुत्यंतरे च प्रसिद्धं निचा
य्य निश्चित्य पृथिव्या अध्याभरत् पृथिव्या इत्युपलक्षणं पृथिव्यादिपंचमहाभूतात्मकं कार्यकरणसंघातात् अधि तत्
संघाते तत्रापि बुद्धौ आहरत् आहरतु तत्तत्पदार्थभूतं ब्रह्म ज्योतिः कार्यकरणसंघाते प्रत्यक्त्वेनाभिव्यनक्ति इति यावत्।
सवितृशब्दवाच्यं मंडलाधिष्ठातारं परमेश्वरं प्रार्थयित्वा तत्प्रार्थनाफलमाह। ।युक्तेन मनसा वयं देवस्य सवितुः सवे।
सुवर्गेयाय शक्त्येति।२। सवितुः प्रसवितुर्देवस्य सवे अनुज्ञायां सत्यां तत्प्रसादात्प्रत्यगात्मन्येकाग्र्येण युक्तेन मनसा
वयं परमेश्वरप्रसादेवसंपन्नशमदमादिसाधनकलापाः सुवर्गेयाय सुवर्गशब्दवाच्यनिरतिशयानंदाभिव्यक्तिहेतुभूत

ज्ञानसाधनश्रवणादिकमर्जे। शक्त्या परमेश्वरप्रसादलब्धबलेन वयं यतामहे इति वाक्यशेषः। मुमुक्षूणां विदुषां अनुग्राह
कत्वं परमेश्वरस्य स्वभाव इत्याह। ।युक्त्वाय मनसा देवान्सुवर्यतो धिया दिवं। बृहज्ज्योतिः करिष्यतः सविता प्रसुविता ता
निति युक्त्वाय प्रत्यगात्मानं योजयित्वा केन एकाग्र्यगुणयुक्तेन मनसा देवान् द्योतनस्वभावान् ब्रह्मेन्द्रादीन् स्वर्यतः स्वःशब्द
वाच्यनिरतिशयानंदस्वभावं पततः गच्छतः दिवं द्योतनस्वभावं बृहदद्वितीयं ज्योतिः चित्प्रकाशं धियो करिष्यतः धिया आविष्करि
ष्यतः मनसः प्रत्यक्प्रावण्यं आपाद्य प्रत्यक्प्रवणमनोऽभिहितोऽहं ब्रह्मास्मीति बुद्ध्या द्वितीयसुखसंवित्स्वभावं ब्रह्म प्रत्यक्
त्वेनाविष्करिष्यत इत्यर्थः। सवितृशब्दवाच्यः परमेश्वरः प्रसुवाति अनुज्ञानाति तान्मुमुक्षून्देवान्ब्रह्मेन्द्रादयोऽपि परमे
श्वरप्रसादलब्धचित्तैकाग्र्यसाध्यब्रह्मात्मैकज्ञानेन कृतकृत्या बभूवुरित्यर्थः। तस्यैव विद्यातपसोर्निमित्तस्य तस्य परमेश्व
रस्य मुमुक्षुभिर्महती परिष्टुतिः कर्त्तव्येत्याह। ।युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः। वि होत्रा
दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिरिति। युंजते योजयंति प्रत्यक्प्रवणं कुर्वंति किं मनः उत अपि धियः
बुद्धीः कृत्याण्यपि शब्दादिविषयेभ्यः समाहृत्य युंजते योजयंति स्ववशं कुर्वंति विप्राः विवेकवंतो ब्राह्मणाः किमर्थं विप्रस्य प्र
पूरणे द्रष्टुः पूर्णस्य बृहतः कालतो वस्तुतोऽपि पूर्णस्य विपश्चितः शस्य तावस्य साक्षात्करणायेति वाक्यशेषः। विहोत्रा द
धे विहोत्रा ऋत्विग्गतिधानमेतत्र इत्थं कर्म कुर्वतः ऋत्विङ्निर्वर्त्यंतिः करणवैमल्यहेतुभूताः क्रियाः सर्वा इति यावत् व
युनावित् वयुनेति बुद्ध्यभिधानमेतत् सर्वबुद्धिवृत्तिसाक्ष्येक इत् एव एकः सजातीयरहितः एव विजातीयरहितः साक्षी अ
द्वितीयः पूर्वोक्ताः क्रियाः दधे विदधे सर्वस्य येन ता न्यपः कृतवान् स एव सर्वज्ञः अद्वितीयः परमेश्वरो जीवरूपेण मोक्षा
र्थानि कर्माणि करोतीति तावत्। तस्यैवं भूतस्य देवस्य द्योतनस्वभावस्य सवितुः स्थावरजंगमस्य प्रसवितुर्मही महती ७
परिष्टुतिर्मुमुक्षुभिः कर्त्तव्येति वाक्यशेषः यथा पूर्वे ब्राह्मणा विद्वांसो बाह्यांतःकरणप्रणिधानमुखेन ब्रह्म साक्षात्कृ
तवंतः तथाहमपि बाह्यांतःकरणप्रणिधानमुखेन ब्रह्म प्रत्यक्त्वेनापरोक्षीकरिष्यामि इति मुमुक्षुराहेत्याह। ।यु

। युजे वां ब्रह्म पूर्व्यं नमोभिर्वि श्लोक एतु पथ्येव सूरेः। शृण्वंतु विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः ।१९
युजे समादधे किं ब्रह्म पूर्व्यं अनादिसिद्धं प्रत्यगात्मने कीकुर्वीत इत्यर्थः केन साधनेन वां युवयोः वाङ्मनसयोः नमोभिर्वि
कृप्रकृतालक्षणस्तुतिभिर्मनः प्रकृतालक्षणे कार्यादिसिद्ध्य मनः प्रणिधानं पूर्वमेव प्रपंचितं इदानीं वाक्प्रणिधान
माह। हे मनोबुद्धी वां अहं प्रत्यगात्मनि युजे समादधे तेन नमोभिर्नमस्कारैः सह मम श्लोकः श्लोक्य पूर्व्यं ब्रह्मलोढिं नेपेचिति वा
क्यार्थः मुमुक्षोर्मम श्लोकः। कीर्तिस्तुतिरीश्वरमुद्दिश्य एतु व्येतु विविधं एतु। पूर्व व्युपसर्गस्याचान्य यः पथ्येव सूरेः प्रा
ज्ञस्य पथ्ये व सन्मार्गवर्त्तमानमनिमित्तकीर्तिरिव विसर्पतु तं च श्लोकं विस्तृतं शृण्वंतु आकर्णयंतु विश्वे सर्वे अमृतस्य
पुत्राः अमृतस्य ब्रह्मणः पुत्राहि हिरण्यगर्भादयः कुत्र स्थिता आ ये आ ईषत् उत्तरत्र संबंधः ये धामानि स्थानानि दिव्यानि दि
व्यत्वानि तस्थुः आतिष्ठंति तत्स्था ब्रह्मणः पुत्रा हिरण्यगर्भादयो मम स्तुतिं शृण्वंत्वित्यर्थः अनेकजन्मानुष्ठितपुण्यनि
चयैः प्रक्षीणाशेषपापस्य शुद्धांतःकरणस्य विरक्तस्य शमदमादिसाधनकलापवत उत्तमाधिकारिणो मुमुक्षोः
मोक्षसाधनमात्मैकत्वज्ञानमुपदिश्य तस्मिन्न योग्यस्य मध्यमाधिकारिणोऽतःकरणशुद्धिद्वारेण तज्ज्ञानाधिकारसिद्ध्य
र्थं योगमुपदिश्यतेत्युत्तरे केचिन्मंत्राः प्रथमं योगं संक्षिप्याह। ।अग्निर्यत्राभिमथ्यते वायुर्यत्राधिरुध्यते सोमो यत्रा
तिरिच्यते तत्र संजायते मनः ।२०। अग्निर्यत्राभिमथ्यते यत्र मूलाधारे अग्निमंडले अग्निरभिमथ्यते मूलबीजेन मथ्य
ते क्षोभ्यते। वायुर्यत्र एव मूलाधारात् सुषुम्नायां अधिरुपरि ऊर्ध्वं निरुध्यते अवरुध्यते विसतंतुनिभाग्निशिखया
सह सोमः कल्याणरूप चंद्रमंडलपत्रद्वादशान्तपर्यंतमतिरिच्यते अतिशयेन रिच्यते यत्र सुषुम्नायामा मूलाधारेऽमृत
स्रवव्रज्याप्यते तत्र मूलाधारे द्वादशांते तस्थित चंद्रमंडले सुषुम्नायां च संजायते मनः ध्यानप्रकारमाह। ।सवित्रा प्र
सवेन जुषेत ब्रह्म पूर्व्यं तत्र योनिं कृणवसे न हि ते पूर्त्तमक्षिपत् ।२१। प्रसवेन जुषेत ब्रह्म पूर्व्यं तत्र योनिं कृणवसेन

हिरण्मयं पक्षि पक्षिपदितिसविज्ञाद्वादर्शात्तस्थितं कल्पार्केण प्रसवेन सोममंडला सुषुम्नायां प्रसुता च्तेनेनजुषेनसे
वेनाधिकारी किं ब्रह्म ध्येयं वस्तु परव्योम कलाधारे स्थितं तत्र मूलाधारे योनिमग्निमंडले ब्रह्मोपासनत्वेन क्षणं वसे कु
रुध नहि तेएवं कुर्वतः तेन च कल्पार्केण विलापितचंद्रमंडलात्सुषुम्नायां स्रवदमृतेन पूर्णं पुष्पितं फलितं मूलाधार
स्थे ब्रह्माक्षिपद्रूनं लक्षिपत् कालक्षेपं न करोति एवं ध्यातं ब्रह्मतरोः फलं प्राप्नोतीत्यर्थः। पद्मासनादीनामन्यतमा
सनं परिगृह्य शरीरस्थापनप्रकाराभिधानपूर्वकं प्रत्याहारेमुक्तानां राश्रयेण न संसाररसं मुद्धरणं सिध्यतीत्या
ह। ।त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिवेश्य। ब्रह्मोडुपेन प्रतरेत विद्वान्स्रोतांसि सर्वाणि भयावहा
नि॥२२॥ त्रिरुन्नतं स्थाप्य उरो ग्रीवा शिर इति त्रीण्युन्नतानि यस्य तच्छरीरं त्रिरुन्नतं यथा स्यात्तथा शरीरं समं
स्थाप्य हृदि हृदयकुहरे इन्द्रियाणि सर्वेन्द्रियाणि मनसा ह्रन मनसा साधनेन संनिवेश्य सम्यक् निवेश्य स्थापयित्वा सम्यक्
पन्येनियावत्। ब्रह्मोडुपेन प्रतरेत प्रकर्षेण तरेत प्रणवस्वरूपेन उडुपेन प्लवेन ब्रह्म च प्रयो विद्वान्स्रोतांसि सर्वा
णि सुरनरतिर्यक्स्थावरादिस्वेदजान्यानि संसारस्रोतांसि भयावहानि यत्र दारुणि अनेनोपायेन संसार दुःखम
हो दधिं प्रतरेदिति योग्याधिकारिणां श्रुतिरनुशास्ति प्राणायामप्रकारमाह। ।प्राणान्प्रपीड्येह सयुक्तचेष्टः क्षीणे
प्राणे नासिकयोच्छ्वसीत। दुष्टाश्वयुक्तमिव वाहमेवं विद्वान्मनो धारयेताप्रमत्तः ॥२३॥ प्राणान् प्राणादि [illegible] ले दक्षिना
न्वा यत्नं प्रपीड्य प्रकर्षेण मनोधारणमुख्येन निरुध्य कुंभक प्राणनिरोधस्थानत्वेन योगशास्त्रेण प्रसिद्ध मूलाधारा
सोधिकारी युक्तचेष्टो नान्यस्य अतः इत्यादिशास्त्रेणोक्ताचेष्टा यस्य युक्ता उपपन्ना सयुक्तचेष्टः [illegible] क्षीणे प्राणे तत्त ८
त्स्थानविरोधेन तत्स्थाने क्षीणे तनुत्वं गते वायौ। नासिकयोच्छ्वसीत तत्स्थाने सम्यङ् रुध्या नंतरं प्राप्तनाडीद्वारेण
इडयापिंगलया वा नासिकापुटेन शनैः शनैः रुद्धं शीतवायुमुत्सृजेत दुष्टाश्वयुक्तमिव वाहं दुर्दान्तैरश्वैर्युक्तं वाहं रथं कुत्राकस
स्थिरियिविद्वान् बाह्यकरणनिरोधप्रकारं तद्द्वारेण वायुनिरोधप्रकारं च विद्वान्मनो धारयेदप्रमत्तः यत्र वायुनिरोध इष्ट स्तत्र

मनो धारयेत्। अप्रमत्तोऽवहितो भूत्वा यत्र मनस्तत्र वा पुरिति वचनात्। योगानुष्ठानयोग्यं देशमाह। ।समे शुचौ शर्करावह्नि
वालुकाविवर्जिते शब्दजलाश्रयादिभिः। मनोनुकूले न तु चक्षुःपीडने गुहानिवाताश्रयेण प्रयोजयेत्। समे समे शुचौ शर्करा
वह्निवालुकाविवर्जिते शब्दजलाश्रयादिभिः मनोनुकूले न तु चक्षुःपीडने गुहानिवाताश्रयेण प्रयोजयेत्। इति समे निम्नो
न्नतप्रकाररहिते शुचौ मेध्ये वह्निवालुकाविवर्जिते शर्कराभिः क्षुद्रपाषाणैः वह्निना वालुकाभिः सिकताभिश्च विवर्जि
ते रहिते शब्दजलाश्रयादिभिः शब्दैः पाणिवादित्रघाद्यादिनिमित्तघोषैः जलैः सतिनिकटवर्त्तिभिः रुद्रकैराश्रयैर्मण्डपा
दिभिर्जलादिभिश्च विवर्जिते जलाश्रया इति ग्राह्यादिर्धो व्यते। प्रधानविशेषमाह मनोनुकूल इति यत्र मनस आनुकू
ल्यलक्षणं अपेक्षितं प्रयोजनं सिद्ध्यति तत्र न तु चक्षुःपीडने छान्दसो विसर्जनीयलोपः अन्योदि इत्यादिभिः रतसे एवं
भूते देशे गुहानिवाताश्रयेण गुहायां निवातस्थानमाश्रित्य प्रयोजयेत् योगे प्रयोजयेत्। योगमभ्यस्यतश्चित्तशुद्धिचिह्नान्या
ह। ।नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां। एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकरा
णि योगे ।२५। नीहारस्तुषारस्तदाकारा प्रथमं चित्तवृत्तिः प्रवर्त्तते तदनंतरं धूमवच्चित्तवृत्तिः प्रवर्त्तते तदनंतरमर्कवत्प्र
वर्त्तते तदनंतरमग्निवदाभाति तदनु वायुवदंतरा बाह्यवायुवत्सुक्षुभितो बलवान्प्रवर्त्तते तदनंतरं खद्योतनिभा चित्त
वृत्तिः प्रवर्त्तते तदनंतरं विद्युन्निभा तदनंतरं स्फटिकनिभा तदनंतरं शशिसन्निभा चित्तवृत्तिः प्रवर्त्तते एवं नीहारधूमा
र्कानलानिलानां खद्योतविद्युत्स्फटिकशशीनां स्वरूपसदृशानि एतानि योगिनो अनुभवसिद्धानि बुद्धेः रूपाणि योगे
क्रियमाणे बुद्धेरभिव्यक्तिकराणि ब्रह्माभिव्यक्तिद्योतकानि पुरःसराणि पूर्वलिंगानि क्रमेणाविर्भवंतीत्यर्थः। अथवा ब्रह्म
णि ब्रह्मविषये योगे चित्तवृत्तिनिरोधलक्षणे अभिव्यक्तिकराणि द्योतकानि ब्रह्मविषयचित्तवृत्तिनिरोधलक्षणयो
गस्याभिव्यक्तिकराणीति पावरभूतं तस्य प्रकारं तल्लक्षणफलं चाह। ।पृथ्व्याप्यतेजोनिलखे समुत्थिते पंचात्म
के योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरं ।२६। पृथिवीतन्मंडलं निर्दृत्याख्यात घ

क्तीश्चात्मसाक्षात्करणेनोपास्यतेनोपासनेन तद्वशीकरणे सत्यनंतरं — — तन्मंडलप्रतिष्ठास्यतच्छक्तीश्चाहं चेन्नत्ता
वयित्वा तेन तद्वशीकरणे सत्यनंतरं वायुस्तत्तन्मंडलस्यांतःस्थस्य तच्छक्तीश्चाभेदेनोपास्यतेन तद्वशीकरणे सत्यनंत
रं वियत्तत्तन्मंडलशांत्यतीतस्य तच्छक्तीश्चात्मसात्वेन भावयित्वा तेन तद्वशीकरणं कृत्वा एवं पृथिव्यामप्सु तेजसि वायौ
खे च क्रमेण समुच्छ्रिते ध्यानेन तत्तत्संयुक्तकार्ययोग्यतया वशीकृते पंचात्मके योगगुणे प्रवृत्ते पृथिव्यादितन्मंडलतद्ध
र्तीनामुत्तरोत्तरत्वेन सर्वसर्वत्वयं वेष्टितं बुधा एतत्सर्वं स्यात्मभेदेनाचिंतयित्वा तेनोपासनेन पंचतत्त्वात्मके योगगुणे जाते नपं
चकस्य यथेष्टविनियोज्यत्वयोग्यतालक्षणे गुणे पस्य योगिनः प्रवृत्ते — निष्पादिते तस्य योगिनोपयोगो ध्यानं तदेवाग्नियो
गाग्निस्तेन ध्यानेनावपत्तीकृत्य पंचतत्त्वात्मकं शरीरं प्राप्तस्य तदस्मीत्यसिमं तु रुक्तं फलं सिध्यति योगसिद्धः स्त्यका
निर्दग्धसावीनिर्ल्हिंगानि योगशास्त्रविदोपि कथयंतीत्याह। ।लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च।
गंधः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदंति। ।स्पष्टार्थः। एवं योगाभ्यासस्य शुद्धांतःकरणस्य प्रत्यक्प्र
वणमनसो योग्याधिकारिणो योगियोगे तत्र फलं चाह। ।यथैव बिंबं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधांतं।
तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः। ।२२। यथैव बिंबमादर्शादि मृदयोपलिप्तं मलपांशुप्र
साधनेन तस्माद्विनाऽकारस्य दकारः उपलिप्तं तेजोमयं सर्वमेव प्रचुरतेजस्कं सुधांतं तस्मादिमलेन सहाय
कृतपूर्वमलं तद्दर्पणादि भ्राजते दीप्यते यथा तद्वदात्मनः स्वयंपदार्थस्तस्य द्वितीयसुखसंवित्स्वरूपं तत्पदार्थनि
तं निजरूपं तत्त्वप्रकृतिप्राकृतमलैरनास्कंदितत्वेन प्रसमीक्ष्याहं ब्रह्मास्मीत्यपरोक्षीकृत्य देही कायकरण
साक्षी एकः अद्वितीयः कृतार्थ एकत्वदर्शनेनाविर्भूतनिरतिशयानंदस्वभावः वीतशोकः प्रध्वस्तसंसारबी
कं तत्कारणश्च यस्तवतेस्तयति तद्वत्तत्त्वमित्यस्मिन्नपि पाठे अयमेवार्थः श्रुत्युक्तमपि सुस्पष्टं बुधा तमिति
शोरस्तं। तत्त्वंपदार्थशोधनद्वारेण जीवपरयोरैक्यमैक्यापरोक्ष्यप्रकारमैक्यापरोक्ष्यान्मोक्षं च दर्शयति।

। ।यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्। अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः ।२८
यदा गुरुमुपसंगम्य तत्सन्निधौ तच्छुश्रूषादिपुरःसरं श्रवणाद्यनुष्ठानकाले आत्मतत्त्वेन तु त्रोद्यो यथा रणे शाधि
तत्त्वंपदार्थेन नित्यप्रेमास्पदसाक्ष्यव्यभिचारि सत्यसुखसंविन्मात्ररूपेण दीपोपमेनेह दीपः स्वप्रकाशत्वाद्विलक्ष
णो दृष्टो यथा तद्वदात्मा स्वद्वयपादेहेंद्रियादिसंघातादिलक्षणो भवितुमर्हतीति दीपोपमेन साक्षाद्विलक्षणसाक्षिरू
पेणैव दृष्टं भावयेत् तदा या आत्मनो निजस्वरूपेणैव ब्रह्मतत्त्वं ब्रह्मशब्दवाच्यमायाशब्दर्थं तस्य न तत्सत्यानंतसुख
बोधैकरसमिह कार्यकरणसंघाते हृदयकुहरे युक्तः शमदमादिसाधनसंपन्नः प्रपश्येत् प्रकर्षेण पश्येत् ।तं
पदार्थशोधनद्वारेणाहं ब्रह्मास्मीत्येकत्वमपरोक्षीकुर्यादिति योग्याधिकारिणमनुशास्ति। आत्मतत्त्वे नास्तिन्येवं
ब्रह्मतत्त्वं पश्येदित्येवं वार्थः। शिष्यस्यानुभवप्रकारमनुभवेन मोक्षं च दर्शयति। ।अजमिति अजं जन्मरहितं ध्रु
वं कूटस्थं नित्यं सर्वतत्त्वैर्विशुद्धं कार्यकरणात्मतत्त्वैः सर्वैरनास्कंदितं देवं द्योतनस्वभावं ज्ञात्वा अहं ब्रह्मादिलक्षणं वि
त ना च स्वात्मत्वेन ज्ञात्वा मुच्यते सर्वपाशैः अज्ञानतत्कार्यलक्षणैः सर्वैः पाशैर्मुच्यते विद्यया स्वतायन्मात्रतया अवि
द्यानिविद्यातत्कार्यहेतो रवीतीत्यर्थः दिक्कालाद्यनवच्छिन्नानंतसुखबोधवपुषः आत्मनो ब्रह्मादिस्तंबांत प्राणि
भेदेन महदाद्यणुपर्यंतेन या वस्थानसर्वात्मत्वेन प्रत्यक्त्वं चाह। ।एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः स उ
गर्भे अंतः। स एव जातः स जनिष्यमाणः प्रत्यङ्जनास्तिष्ठति सर्वतोमुखः ।२९। एषो ह देवः एष प्रकृतः हशब्दस्त्वर्थे देवो
द्योतनस्वभावो दिक्कालाद्यनवच्छिन्नानंत द्वितीयसुखसंवित्स्वभावः प्रकृत आत्मैव प्रदिशः सर्वाः प्रति अनुगतः व्या
प्य स्थितः पूर्वो ह जातः कल्पादौ शरीरिभ्यः पूर्वेभ्यः पूर्वः प्रथमशरीरी हि इत्येवार्थे जातः उत्पन्नः हिरण्यगर्भरूपेण
पि एष एव जात इत्यर्थः स उ गर्भे अंतः सर्वा दिशो व्याप्य स्थितो यो हिरण्यगर्भरूपेण प्रथमशरीरित्वेन जातः स उ
एव गर्भे ब्रह्मांडोदरे अंतः विराड्रूपेणापि वर्त्तते स एव जातः सूक्ष्मकार्यकरणोपाधिकत्वेन हिरण्यगर्भादिरूपे

णज्ञातो यः स एव परमात्मा व्यष्टित्वेन तानेन कार्यकरणोपाधिकत्वेन व्यष्टित्वेन तानेन तं जीवात्मना ज्ञातः एवमनु कार्यकर
णोपाधिकत्वेन ज्ञायमानोपि स एव प्रत्यङ् ज्ञ नास्तिः इति अनंत समष्टिव्यष्ट्यात्मके कार्यकरणोपाधिषु प्रत्यगं
तरत्वेन वर्तमानः सुखः स एवावस्थितः हे ज्ञना इत्यन्योन्यं संबोधनं वा ज्ञनान्प्रतीति वा अस्मिन्पक्षे प्रथमा द्वितीयार्थे
परमात्मैव हिरण्यगर्भादिरूपेण ज्ञात इत्युक्तं घटाकाशजलचंद्रन्यायेन तज्ज्ञानस्वरूपेणेत्याह। ।यो देवो
अग्नौ यो ऽप्सु यो विश्वं भुवनमाविवेश। य ओषधीषु यो वनस्पतीषु तस्मै देवाय नमो नमः।१७। यो देवो अग्नौ यः प्रस
न्नो देवः स्वयंप्रकाशचिन्मात्रवपुः परमात्मा अग्नौ शब्दादितन्मात्रपंचककार्यत्वेन तत्पंचकव्यापिवह्नौ ज्वलेचं
द्रवद् घटआकाशवद्धिरण्यगर्भरूपेण विवेश। यो अप्सु यः स्वयंप्रकाशचिदेकरसः परमात्मा अप्सु अश
रीरोपलक्षितपंचीकृतपंचमहाभूतकार्यतया पंचमहाभूते तस्यापि ब्रह्मांडे विराट्शब्दाभिलप्यत्वेनाविवे
श। यो विश्वं भुवनमाविवेश यो अनंतसुखबोधवपुरात्मा व्यष्टित्वेन तज्जंगमरूपकार्यकरणोपाधिषु भुवनश
ब्दवाच्येष्विंद्रादिशब्दाभिलप्यत्वेनाविवेश भुवनं विश्वं वस्तु दृश्यं भुवनसत्तास्फुरणप्रदत्वेनाविवेशेति वा
र्थः। भवतीति भुवनं कार्यं विश्वं सर्वं महदादिसर्वकार्यसत्तास्फुरणप्रदतया आविवेशेति वार्थः य ओषधीषु फ
लपाकावधिषु स्थावरकार्यकरणोपाधिषु यः सुखानुभूतिरा सोपाधिशब्दाभिलप्यत्वेनाविवेश यो वनस्प
तिषु यः सम सुखापरोक्षस्वभाव आत्मा पुष्पं विना फलवत्सुस्थिरस्वरूपकार्यकरणसंघातेषु वनस्पतिषु वन १०
स्पतिशब्दाभिलप्यत्वेनाविवेश आविवेशोऽस्य सर्वोत्तरेष्वनुवर्तनं स्पष्टं तत्सृष्ट्वा तदेवानुप्राविशदि
त्यादिश्रुत्यंतरात् तस्मै सर्वांतरात्मने देवाय अनंतसुखसंविन्मात्रवपुषे नमो नमः। नमस्कारः सर्वोपद्र
वशमनार्थं द्विर्वचनमध्यायपरिसमाप्त्यर्थमादरार्थं वा॥ ॥द्वितीयोऽध्यायः॥ ।प्रसन्नात्मानिताखिलसेदा

संगो विकारि सुखसंविन्मात्रवपुष आत्मनो मायाविन इव स्वमायया जगदुत्पत्तिस्थितिलयकारणत्वं सर्व
नियंतृत्वमद्वितीयत्वं प्रत्यक्त्वं चाह । । य एको जालवानीशत ईशनीभिः सर्वांल्लोकानीशत ईशनीभिः । य एवैक
र उद्भवे संभवे च य एतद्विदुरमृतास्ते भवंति । ३ । य एकः स्वापरसिद्धिक अद्वितीयः जालवान् जालं माया
तद्वत्त्यादुर्भेद्यत्वाज्जीवात्मनस्य स्वबंधकत्वात् तद्वान् तस्य स्वरूपस्फुरणप्रदत्वेनाधिष्ठानत्वात्तद्वानीशते ईष्टे
ईशनीभिः मायातच्छक्तिभिस्तत्तत्कार्यरूपसमष्टिभिरेव न च स्वतो विकारित्वात् सर्वांल्लोकाल्लोक्यंत इति लोकास्तान् द
रूपपदार्थान् भूरादिल्लोकान् प्राणिभेदांश्चेशत ईष्टे ईशनीभिरीशनसमर्थै रूपादिभिरेव मायापरिणामकं संघातमा
त्मकं सन्मायाशक्तीरीष्टे मायात्मशक्त्यात्मकः सन् कार्यरूपतत्तन्मात्रीरीष्टे तत्तन्मात्रात्मकः सन् तैस्तद्ब्रह्मरूपपदार्थानीष्टे
पंचीकृतमहाभूतात्मकः सन् तैस्तद्बुद्धिरूपता सर्वपदार्थानीष्टे मायावी मायया प्रदर्शितनिखिलसमनुष्यादीन् हस्त्यश्व
व्याघ्रादींश्च स्वमाययेष्टे यथा तद्वत्परमेश्वरस्य सर्वनियंतृत्वमुक्त्वा तस्यैव नियम्योत्पत्तिलयहेतुत्वमद्वितीयत्व
सिद्ध्यर्थमाह । य एवेति य एवैकः य एव स्वयंप्रकाशचिन्मात्रवपुरेवेश्वर एकोऽद्वितीय उद्भवे सर्वस्योत्पत्तौ कारणत्वेन स्थितः सं
भवे सम्यक् भवः कारणमात्रतया भवः कारणे कार्यापत्तिस्तल्लक्षणलयोत्पत्तौ निमित्तत्वेन स्थितः य एतद्विदुरमृतास्ते भवं
ति ये साधनचतुष्टयसंपन्ना एतद्वेदितव्यमिति सर्वत्र पुंलिंगनिर्देशात् सर्वनियंतारं सर्वोत्पत्तिस्थितिलयकारणं सच्चित्सुखै
करसमात्मानं स्वतावन्मात्रतया विदुरपरोक्षीकुर्युरमृतास्ते भवंति तदपरोक्षीकृतैकत्वा अमृता भवंति विद्यया म
रणादिसंसारहेतुभूतामविद्यां स्वतावन्मात्रतया दग्ध्वा नित्यसिद्धब्रह्मरूपाः पुरुषार्था भवंतीत्यर्थः । पूर्वमंत्रोक्तमेवा
र्थं प्रपंचयति दुरवगाहत्वात् । एको हि रुद्रो न द्वितीयाय तस्थुर्य इमांल्लोकानीशत ईशनीभिः । प्रत्यङ् जनास्तिष्ठति सं
चुकोचांतकाले संसृज्य विश्वा भुवनानि गोपाः । २ । एको अद्वितीयः हि यस्माद्रुद्रः सर्वं रोदयति संहरति प्रलयादा

चितिरुद्रः रुद्रं संसारदुःखं द्रावयतीति इय रुद्रस्तस्मान्नद्वितीयायाद्वितीयभावाय तस्थुः स्थितवंतः अद्वितीयः सत्यसुख
बोधरूपत्वाद्रुद्रस्य तदधीनसत्तास्फुरणवत्वान्मायातत्कार्यरूपप्रपंचजातस्य अनंतस्य सतो रुद्रस्य साद्वितीयत्वा
पादकत्वेन कार्यकरणरूपाः सर्वपदार्थाः स्थाणुं नचाकाः इत्यर्थः द्वितीयाय प्रमाणानि न्यायाश्च न तस्थुः स्थितिकं ईश्वर
स्य पदे पदे अद्वितीयत्वेन प्रतिपादनात्परमार्थतो अद्वितीयस्यैव प्रतिपादनाद्धि तस्य पदे पदे ज्ञानमात्रं नियत्यै
प्रतिपादनान्मिथ्यात्वं सिद्धं परमात्मा लोकानीशत ईशनीभिः प्रत्यङ् जनास्तिष्ठतीत्येतस्यार्थमेवं व्याख्यातीयं संचुको
चांतकाले संचुकोच संकोचयति संहरति अंतकाले प्रलयकाले संसृज्य विश्वा भुवनानि सर्गकाले वियदादिम
हाभूतानि सृष्ट्वा तदंतर्नामरूपाणि विश्वा विश्वानि भुवनानि संसृज्य सत्तास्फुरणप्रदत्वेन सम्यक् सृष्ट्वा गोपाः स्थि
तिकाले आनंदप्रदत्वेन गोपायति ब्रह्मादिस्तंबपर्यंतानां प्राणिनां कार्यकरणानीश्वरस्यैव कार्यकरणानि। इति प्र
तिपादयति कार्यकरणानि स्वमायया सृष्ट्वा तेष्वनुप्रविश्य चिद्रूपजीवत्वाद्वाविल्लप्यत्वेनेश्वरस्यैव स्थितत्वात्। ।विश्व
तश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात्। सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन्देव एकः॥३॥ आ
ब्रह्मस्तंबपर्यंतानां प्राणिनां चक्षूंषि यस्येति विश्वतश्चक्षुरुत अपि उत्तरत्र सर्वत्र समानैव योजना इतरेंद्रियाणां उपल
क्षणं एतत्सर्वप्राणिनां करणसंयोजयितात्वेष एव सं बाहुभ्यां इति बाहुभ्यां मनुष्यादीन् संधमति संयोजयति अनेकप्रकारा ११
हि धातवः संपतत्रैः पतनसाधनैः पादैः संधमति उपलक्षणेनेतरेंद्रियसंयोजयितृत्वमप्युक्तं द्रष्टव्यं अथवा पतत्रैः
पक्षैः संपक्षिणः संधमति सर्वेषां स्रष्टाप्येष एवेत्याह। द्यावाभूमी उपलक्षणमेतत्सर्वलोकास्तन्नुवर्त्तिपदार्थाश्च स
वर्णितं न पनुसादयन्देवो द्योतनस्वभाव एक अद्वितीयः संधमतीति पूर्वेणान्वयः व्यष्टिकरणाधिष्ठातॄणां समष्टिरूप
णानिमानि नां अन्यादि देवतानां उत्पत्त्यादिहेतुत्वं सर्वकरणव्यापि समष्ट्यंतःकरणाभिमानि हिरण्यगर्भोत्पत्ति
हेतुत्वमीश्वरस्य मुमुक्षूणां ईश्वरात्सम्यग्ज्ञानप्रार्थनं चाह। ।यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः हि

सम्यक्ज्ञानसिध्यर्थं मुमुक्षोः प्रार्थनामाह। ।यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे। शिवां गिरित्र तां कुरु मा हिंसीः
पुरुषं जगत्।३६। यामिषुं शास्त्रेषु सर्वसंहारसमर्थत्वेन प्रसिद्धां इषुं गिरिशंत तथ्याख्यानमेतत् हस्ते बिभर्षि धार
यसि। अस्तवे उपसंहर्त्तव्यान् प्रति प्रक्षेप्तुं शिवां शुभां गिरित्र गिरौ स्थितः सन् सर्वं त्रातीति गिरित्रः हे गिरित्र तां स
र्वसंहारसमर्थत्वेन प्रसिद्धां कुरु शिवां कुर्विति पर्वेणान्वयः। मा हिंसीः पुरुषं जगत् मा हिंसीः हिंसां माकार्षीः किं पुरुषं स
म्यक्ज्ञानसाधनभूतं कार्यकारणसंघातं जगत् सम्यग्ज्ञानकारणेतिकर्त्तव्यभूतं ये दीतावत्या कोटिके यावत्सम्यक्ज्ञा
नेन तत्त्वनिष्कलस्वरूपाविर्भावः तावत्सम्यग्ज्ञानोत्पत्त्येन मा हिंसीरित्यर्थः देवस्य निर्गुणतत्त्वेन ज्ञानेन ज्ञाना
न्मोक्षं चाह। ।ततः परं ब्रह्म परं बृहंतं यथानिकायं सर्वभूतेषु गूढं। विश्वस्यैकं परिवेष्टितारं ईशं तं ज्ञात्वामृता
भवंतीति।३७। देवं प्रसाद्यानंतरं ततो देवप्रसादं यथावज्ज्ञात्वा अमृता भवंतीत्यन्वयः। कीदृग्भूतं देवं ज्ञात्वा
अमृता भवंतीत्यपेक्षायां आह परं ब्रह्मेत्यादिना परं निर्गुणं ब्रह्म परमुत्कृष्टं सुखरूपं बृहंतं कृत्स्नं नित्याद्वितीयं
ईशमिति विष्टोप्यत्रा सुब्लिंगानिर्देशाः यथानिकायं यथाकायं करणसंघातलक्षणं निकायं स्थितो निविष्टो यः संस्
थानतथा च गम्यते इति यथानिकायं त्रिकोणत्वाद्यवस्थाविशिष्टापोऽनुगतवह्निवत्सर्वभूतेषु च गूढं ब्रह्मादिस्तं
बपर्यंतेषु सर्वभूतेषु गूढं पृथिव्यादिमहाभूतेषु गूढं सर्वविकारेषु च गूढं विश्वस्यैकं परिवेष्टितारं मायावी वय्या १२
ग्रहस्त्यादीन् परिवेष्ट्य स्थितः मृगतृष्णिकोदकं रजतादीन् स्वरशुक्तिकादि परिवेष्ट्य स्थितो यथा तथा विश्वस्य
परिवेष्टितारं अत एव कर्म[illegible]जीपमीशं तं तथाभूतार्थभूतमेवं रूपमीश्वरं प्रत्यक्षेन ज्ञात्वा अपरोक्षीकृत्वा अमृता भवं
नीतिनि सप्रसिद्धं ब्रह्मा न[illegible]यंति एकत्वदर्शिनि न साधनांतरा ज्ञानसमुत्थितात्र्यवधापिकाविद्यानाशाद्भवंती
युपचारः। ज्ञानार्थ प्रशंसनाय मंत्र दर्शयंचानुभवं दर्शयित्वा ब्रह्मात्मैकत्वज्ञानादेव कैवल्यसिद्धिः न साध
नानंतराज्ञानसमुत्थितात्कैवल्यादयेत्याह। ।वेदाहमेतं पुरुषं महांतं आदित्यवर्णं तमसः परस्तात् तमेव वि

दित्वातिमृत्युमेति नान्यः पंथा विद्यते अयनायेति।८।वेदआनामिश्रोहं श्रुतन श्रुत्वाहं एतं प्रकृतं पुरुषं पुरिशयपना
तुरूपं महांतम् द्वितीयमादित्यवर्णं स्वयंप्रकाशचिन्मात्ररूपं तमसः परस्तात्।स्वयंप्रकाशबोधवपुष्ट्वात् ज्ञा
नमसावास्तव मुख्येक्य तादात्म्यसंबंधासहत्वेन तमसः परस्तात् अवस्थितं तमेव विदित्वातिमृत्युमेति।तमेव
स्वरूपतिं प्राप्तनैरनास्कंदितमेव विदित्वा नान्यद्विदित्वा वा सम्यग्ज्ञानात् तत्वतो विदित्वैव नाविदित्वा वा अतिमृत्युमेति।अ
ज्ञानलक्षणमृत्युमेति अतीत्य परमपुरुषार्थरूपं तमेवात्मानमेति सर्वलयस्थानत्वादज्ञानतमो मृत्युस्तत्सम्यग्ज्ञा
नफलकीरूपास्वतावन्मात्रतयाददहीत्यात्मातिमृत्युस्तमतिमृत्युमेति वा।नान्यः पंथा विद्यते अयनायेति ज्ञान
मार्गादन्यो मार्गो न विद्यते श्रुतिस्मृतिपुराणन्यायेषु अयनायापवर्गगमनाय मोक्षप्राप्तये इत्यर्थः।ब्रह्मात्मैकत्व
विद्याविलसितत्वक्रियाकारकत्वादिरूपद्वैतप्रपंचस्य कल्पितविषयस्य सम्यग्ज्ञानबाध्यत्वादेकत्वे ज्ञानं मोक्षसाधनं
नान्यदित्याह। यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चित्।वृक्ष इव स्तब्धो दिवि तिष्ठत्येक
स्तेनेदं पूर्णं पुरुषेण सर्वं।९। यस्मात्पुरुषात्परं उत्कृष्टमपरं अन्यत्किंचिन्नास्ति अपास्तसमस्तातिशयपूर्णानंदै
करसत्वात्तस्मात्परमुत्कृष्टं नास्ति तदन्यस्य सर्वस्य तद्विद्याविलसितत्वात् तस्मादपरमन्यन्नास्तीति।यस्मान्ना
णीयो यस्मादणीयः अणुतरं सूक्ष्मतरं नास्तीति स्वयंप्रकाशचिदेकरसत्वात् सूक्ष्मनस्तदन्यस्य जडत्वेन स्थूलत्वान्न
ज्यायोस्ति कश्चिन्न ज्यायः महत्तरमपि कश्चित्किंचिन्नास्ति प्रत्यगात्माधीनसत्तास्फुरणत्वात्तदन्यस्य सर्वस्य।वृक्ष
इव स्तब्धः निवातदेशस्थ वृक्ष इव स्तब्धोविकारी सर्वविकारानास्कंदित इति यावत्।दिवि तिष्ठति अखंडानंदात्मनि व्यं
जकत्वेन द्योतनस्वभावायां दर्शनानंदात्मव्यंजकत्वेन क्रीडारूपायामहं ब्रह्मास्मीति बुद्धौ प्रमेयत्वेन तिष्ठति दिवि स्व
यंप्रकाशचिदेकरसे स्वे महिम्नि तिष्ठतीति वा दिवि द्योतनस्वभावे आदित्यमंडले तिष्ठतीति वा एकोद्वितीयस्तेन

दंपूर्णं पुरुषेण सर्वंस्वर्णादिरूचकादिवद्रज्ज्वादिरिव सर्पादिवत्तेन प्रकृतेन पुरुषेण देशतः कालतो वस्तुतश्चान
वच्छिन्नेनेदं दृश्यमानं सर्वं पूर्णं सर्वतो व्याप्तं अतईश्वरव्यतिरिक्तं किंचिदपि नास्ति अत ईश्वरैकत्वज्ञानादे
वापवर्गसिद्धिरिति सम्यग्बोधोक्तं ब्रह्मात्मैकत्वज्ञानवतामेव पुरुषार्थलाभः एकत्वज्ञानहीनानामितरसाधनाव
त्वंविनां पुरुषार्थलेशोपि न संभवति प्रत्युत दुःखमेवेत्याह। ।ततो यदुत्तरतरं तदरूपमनामयं। य एतद्विदुर
मृतास्ते भवंत्यथेतरे दुःखमेवापियंति ।१०। यस्मादीश्वरैकत्वज्ञानादेवकैवल्यसिद्धिस्ततस्तस्मादुत्तरतरं अ
थवा सर्पादिव्यापकरज्ज्वादेः सर्पादिबाधेपिस्थितत्वादुत्तरत्वं यद्रुचकादिव्यापकस्वर्णादेः रूचकादिलयेपिस्थितत्वा
दुत्तरत्ववद्भौतिकलयेपिस्थितानांस्थितत्वादुत्तरत्वंवद्व्याप्यव्यापकभावेन वर्त्तमानानां प्रकृतिप्राकृतानां सर्वेषां स
त्तास्फुरणप्रदतया व्यापकः पुरुषः उक्तोयतस्तस्मात्प्रकृतिप्राकृतसर्वबाधेपिस्थितत्वादुत्तरतरं। अथवा प्रकृतिप्रा
कृतानां हेयभूतानां सर्वेषामधिष्ठानत्वेन व्यापकोयतस्ततरदुत्तरं परं दुरूह्यतरं उत्तरतरं यत्तदरूपं करचरणा
दिरूपहीनं कार्श्यादिरूपहीनं वा उपलक्षणं रूपरसादिहीनं वा अनामयं दुःखरहितं संसाररोगशून्यं उरूविशे
षणं तत्पदार्थभूतमीश्वरतत्त्वं एतत्त्वंपदार्थभूतं प्रत्यगात्मत्वेन ये साधनचतुष्टयसंपन्ना कोप्याधिकारिणो वि
दुरपरोक्षीकुर्युस्तेऽपरोक्षज्ञानवंतः एकत्वविषयापरोक्षज्ञानात्स्वरूपव्यवधायकाविद्यातत्कार्यद्वैतभ्रमंस्व
रूपमात्रतया प्रविलाप्यामृता भवंति नित्यसिद्धब्रह्मस्वरूपा भवंति अथेतरे पक्षांतरे एकत्वज्ञानमनाश्रित्यसा १२
यन्नोतराण्यवलंबयंते स्थितास्त इतरे दुःखमेवापियंति दुपर्युपरि दुःखमेव प्राप्नुवंति न सुखलवमपि। ईश्वर
स्याद्वितीयत्वसिद्धये प्रत्यगात्मत्वमेव व्यभिस्याह। ।सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः। सर्वव्यापी स भग
वान्स्तस्मात्सर्वगतः शिवः ।११। सर्वकार्यकरणानि स्वमायया प्रकाश्य उल्लंघ्य तेष्वनुप्रविश्य जीव इति नामांतरा
सिद्धप्यत्वेनेश्वरस्यैवस्थितत्वात्सर्वप्राणिनां सर्वाणि शिरांसि सर्वाग्रीवाश्चास्यैवेति सर्वाननशिरोग्रीवः

रण्यगर्भं जनयामास पूर्वं स नो बुद्ध्या शुभया संयुनक्तु ।३४। अस्यायं प्रकाशो देवानामग्न्यादित्यादीनां प्रभवश्चोत्पत्तिक्रमा
प्तिलोम्येन यस्मिन्नसंभवो लयस्थानमित्यर्थः । उद्भवश्च उद्भवत्यस्मादित्युद्भव उत्पत्तिस्थानमितियावत् । अनेकाद्युपस
र्गादिश्चाधिकः विश्वश्चासावधिकश्चेति विश्वाधिकः अधिक उत्कृष्टः निरतिशयानन्दस्वभाव इतियावत् ऋषिश्च सम्यग्दृष्टि
कृदिति वा अथवा यो देवानां द्योतनस्वभावानामखिलप्राणानां प्रतिबिंबलक्षणानाम स्वांडस्य भावात्स्यादीश्वरो बिंबतुल्यो
स्यात्ते प्रभवप्रहेतुर्विसरखंडस्वभावत्वमुक्तं विश्वाधिक इत्यपास्तातिशयानंदस्वभावत्वमुक्तं रुद्रो व्याख्यातम् ते तदेव इतिके
चिद्रूपं तन्निमहर्षिर्महांश्चासावृषिश्च महर्षिर्महान्निरवग्रहमहत्वसंपन्न ऋषिः सर्वज्ञो हिरण्यगर्भं जनयामास पूर्वं क
रण्याभिमानिनं हिरण्यगर्भं जनयामास उत्पादितवान् पूर्वं सर्गादौ सः अपास्तातिशयानंदैकरसबोधविग्रहः परमेश्व
रः नः शमादिसाधनसंपन्नान् योग्याधिकारिणोऽस्मान् बुद्ध्या अपवर्गहेतुभूतया शुभया शुभवस्तुविषयया अपास्ता
तिशयानंदैकरसैकविषयया संयुनक्तु संयोजयतु । प्रत्यक्चैतन्ये निःसंगसुखसंविन्मात्रैकरसे स्वात्मस्याविर्भावानुशास
नं मुमुक्षोराह । । या ते रुद्र शिवा तनूरघोरापापकाशिनी । तया नस्तनुवा शंतमया गिरिशंताभिचाकशीहि ॥३५॥
या ते रुद्र शिवा तनूः । या श्रुतिस्मृतीहासपुराणेषु प्रसिद्धा ते सकलनिष्कलतनोस्तव हे रुद्र सर्वसंसारतापोपशमनहेतु
त्वेन तया निष्कलतनो रक्षित्वे रुद्रशब्द एव प्रमाणमित्याह रुद्रेति शिवा शुद्धा जड तद्धितदोषमलरहिता अपास्तातिशयानंद
स्वभावा यावत् तनूस्तनुः निष्कलस्वरूपं अघोरा प्रसन्ना संसारतापोपशमतया अपापकाशिनी पापकाशिनी न भ
वतीत्यपापकाशिनी स्वाभिव्यक्त्या सर्वपापदग्ध्रीत्येतत् । पुण्यप्रकाशिनीति वा स्वाभिव्यक्तेः सर्वफलत्वात् अपहत
पाप्मादिस्वरूपा वा तया नः साधनचतुष्टयसंपन्नान् तनुवा निष्कलस्वरूपया शंतमया सुखतमया अद्वितीयानंद
स्वरूपया हे गिरिशंत गिरौ पर्वते कैलासाख्ये स्थितः शं सुखं तनोतीति गिरिशंतः गिरिशंत एव शंतएतस्येवानंदस्यै
स्यादेव ब्रह्मेन्द्रादीनां सर्वेषां सुखदातृत्वेन प्रसिद्ध इति वा गिरिशंत अभिचाकशीहि अभि आभिमुख्येन प्रत्यक्त्वे
न अभिचाकशीहि प्रकाशस्व मुमुक्षून् प्रतितत्वं निष्कलरूपेण त्वं प्रकाशस्वेतियावत् । घोरा सगुणतनुरिति

ब्रह्मादिस्तंबपर्यंतानां सर्वेषामात्मानमनादिरस्येति वार्थग्रहः इतरावयवानामप्युपलक्षणमेतत्सर्वभूतगुहाशयः। आ
ब्रह्मस्तंबपर्यंतानां सर्वेषां भूतानां हृदयकुहरे शयः शेते नस्थित इति सर्वभूतगुहाशयः सर्वव्यापी समष्टिव्यष्टिरूपेण
व्यवस्थितान्सर्वान्पाति सर्वदा व्याप्नुतीत्येवं नमस्येति सर्वव्यापी स भगवान्समग्रैश्वर्यवीर्ययशःश्रीज्ञानवैराग्याख्या
भगा अस्येति भगवान्सर्वाननन्त्रियंत्रीवत्तात्सर्वभूतगुहाशयत्वात्सर्वव्यापित्वाद्भगवच्छब्दार्थत्वाच्च सर्वगतः स
र्वतो गतः सर्वत्र न गतो वा अद्वितीय इत्यर्थः यावच्च। शिवः अविद्याद्यात कार्यमलरहितत्वात्परिपूर्णानंदस्वभावत्वाच्च शिवः।
अंतःकरणशुद्धिसर्वकर्मज्ञानाधिकारस्य तत्फलमोक्षस्य चेश्वर एव प्रदातेत्याह। महान्प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्त
कः। सुनिर्मलामिमां प्राप्तिमीशानो ज्योतिरव्ययः।१२। महान् देशकालाद्यपरिच्छिन्नः प्रभुर्जगदुत्पत्तिप्रवेशस्थितियम
नसंहारसमर्थः वै प्रसिद्धो। पुरुषः पुरिशयनात्पुरुषः स्वयं पूर्णत्वात् आराधनरूपयोगादीनुपासनादीनि च कारयित्वा नैस्ते
षां सत्त्वस्यांतःकरणस्यैव मन्त्रापादनं द्वारेण प्रत्यक्प्रावण्यमापाद्यस्यैव ज्ञानं प्रतिप्रवर्तक एव ईश्वरः सुनिर्मलां
मविद्यादिमलरहितामिमां श्रुतिन्यायविद्वदनुभवसिद्धां प्राप्तिं सर्वसंसारकारणोपशमरूपां निरतिशयानंदावि
र्भावलक्षणामपवर्गाख्यां प्राप्तिं ज्ञानतः मुमुक्षोः स्वरूपत्वेन स्वाविर्भावस्यैव मोक्षत्वात्सम्यग्ज्ञानप्रतेपः सन्नस्वैक्यतिर
स्कारक सर्वसंसारतत्कारणदाहं कृत्वा मोक्षस्येशानः इत्युच्यते। ज्योतिरव्ययः ज्योतिः स्वयंप्रकाशचिन्मात्रवपुरव्ययः
कूटस्थनित्यः। परमेश्वरस्यैव सर्वांतःकरणोपाधिषु अनुप्रवेशनिबंधनेन जीवत्वं सम्यग्ज्ञानेन जीवभावे व्युदा
से न निजरूपेणाविर्भावं वाह। ।अंगुष्ठमात्रः पुरुषोंतरात्मा सदा जनानां हृदये संनिविष्टः। हृदा मनीषा मनसाभि
क्लृप्तो य एतद्विदुरमृतास्ते भवंति।१३। अंगुष्ठमात्रः पुरुषः स्वस्यांगुष्ठमात्रपरिमितेन हृदयेन मीयत इति अंगुष्ठ
मात्रः पुरुषः पूर्णत्वात्पुरिशयनाद्वा पुरुषः अंतरात्मा सर्वप्राणिषु रज्ज्वादिवत्सर्वोपाधिष्ठानरज्जुत्वेनास्थितः सर्वेषां

पाधीनां स्वरूपत्वाद् अंतरात्मा सदा जनानां नित्यं स्वकाकाश्चिवसंबंधः जनानां जननादिधर्मवतामुपाधीनां सदा अं-
तरात्मा सदा जनानां हृदये सन्निविष्ट इति च। अंगुष्ठमात्रत्वं नास्य ततः किंतु अंगुष्ठपरिमाणहृदयावच्छिन्नत्वात् सदा जनानाम् अं-
गुष्ठमात्रत्वम् इत्याह हृदये सन्निविष्ट इति सम्यङ्निविष्टः हृदयाख्यस्तस्य शरीरस्य स्वरूपास्फुरणप्रदेशे न निविष्ट- नं ८२
त्वाद् हृदये सन्निविष्टः हृदा हृदयेन स्वबुध्याभिप्रकाशित इत्युक्तं। अथवा हृदा मनीषा हृत् हरणे हृदा इत्यादि सर्वज्ञ-
लिङ्गोपदेशेन मनीषा दिवारेणात्मानात्मविवेकविषये मनसा तदुत्पन्नजनितसम्यग्ज्ञानेनाभिक्लृप्तोऽभिप्रका-
शितः। यदा मादिसाधनसंपन्ना एनम् एतत् सम्यग्ज्ञानेन नांतरीयकं तया अविद्यातत्कार्योपाधिं प्रविलाप्य विदु-
रपरोक्षीकुर्युस्ते सम्यग्दर्शिनो अमृता भवंति जन्ममरणादिसंसारस्य महेत्वविद्याबाधाद् अमृता भवंतीत्युच्यते। स
परमेश्वर एव स्वमायया सर्वकार्यकरणानि सृष्ट्वा तेष्वनुप्रविश्य जीवाख्यां लभत इति सर्वेषां कार्यकारणानाम् ईश्व-
रस्यैव कार्यकरणत्वम् ईश्वरस्य स्वतो विशुद्धतां चाह। । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। स भूमिं वि-
श्वतो वृत्वात्यतिष्ठद् दशांगुलं। ॥ सहस्रशीर्षा सहस्राणि अनंतानि शीर्षाण्यस्येति सहस्रशीर्षा पुरुषः पुरि शयनात् पू-
र्णत्वाद् वा पुरुषः स भूमिं विश्वतो वृत्वा स सर्वतः परमेश्वरः पुरुषः भूमिं भूम्युपलक्षितं भूतभौतिकं सर्वं विश्वतः स-
र्वतः अंतर्बहिश्च वृत्वा व्याप्यात्यतिष्ठद् दशांगुलं तन्मात्रपंचकं समष्टिरूपं हिरण्यगर्भं पंचीकृतं पंचमहाभूतसम-
ष्टिरूपं विराड्रूपं वा हृदयात्मकं दशांगुलं अतीत्य असंगे अधिकारे अनंते सत्यसुखसंविन्मात्रे कारसे स्वे महि- १४
म्नि अतिष्ठत् स्थितवान्। अथवा मायां प्रकृतिं भूतपंचकं महत्कारस्वलुप्तं वा एतद् दशांगुलं दशापर्यात्मकं अतीत्य
स्थितवान्। अथवा भौतिकं सर्वं मनो बुद्धिर् व्याप्य दशेंद्रियाणि दशादिशो वा इत्येवमादीनि दशसंख्याकानि यानि तानि
सर्वाणि अंगुलपरिमाणमात्रोपलक्षितानि परिच्छिन्नानि स्थानान्यतीत्य स्थितवान् इति वा। अथवा भौतिकं सर्वम् अंतर्-

नवद्विर्यायप्रदेशोऽपि पाणिदशांगुलोवाइत्येवमादीनि) तदपेक्षं दशांगुलमतिरिच्यातिष्ठत् भौतिकं सर्वमपेक्ष्य दशांगुल
मतिरिच्यस्थितवानभिरवग्रहमहत्त्वसंपन्न इति यावत्। सहस्रशीर्षेत्युक्ते इत्येति पुरुषव्याप्त्यैनोक्ता अत्यतिष्ठद्दशां
गुलमित्यतिक्रमेणाविषयत्वेनयोक्तं यत्त्विदं सर्वं पुरुषाविद्याविलसितत्वान्निरूप्यमाणे सर्वकल्पनाधिष्ठानपु
रुषमात्रमेवेत्याह। ॥ पुरुषएवेदं सर्वंयद्भूतं यच्च भव्यं। उतामृतत्वस्येशानोयदन्नेनातिरोहति॥ पुरुषएवेदं स
र्वमिति विभक्तकालत्वपरिच्छिन्नत्वादहं ततोऽह्य पुरुषव्यतिरिक्तं रज्जुसर्पादिवदविद्यात्मकमेवेत्युक्तं इदमिति दृश्य
त्वाद्रज्जुसर्पादिवदविद्यात्मकमेवेत्युक्तं। यद्भूतं यच्च भव्यमिति त्रैकाल्ये वर्त्तमानात्मकत्वात्स्वप्नप्रपंचवदविद्या
त्मकमेवेत्युक्तं। ततो अविद्यात्मके प्रपंचे निरूप्यमाणे सर्वकल्पनाधिष्ठानपुरुषमात्रमेवेत्याह। पुरुषएवेदं सर्वं
यद्भूतं यच्च भव्यं इति उतामृतत्वस्येशानः उत अपि अमृतत्वस्य प्रतिभासमात्रसंसारतत्कारणनिवृत्तिलक्ष
णस्येशानः महावाक्यजनिताहं ब्रह्मास्मीति सम्यग्ज्ञानफलकारूढः सत्यसुखस्वसंविन्मात्रेयं पुरीश्वरोऽविद्या
नकार्यसंसारस्वभ्रमनिवर्त्तकत्वादमृतत्वस्येशान इत्युच्यते। यदन्नेनातिरोहति यदन्नस्येशानं अन्नमद्यते बा
ध्यते सम्यग्ज्ञानेनेत्यन्नं मायातेन मायारूपेणान्नेनातितत्स्वभावमतिलंघ्य द्वितीयवस्तुविपरीतरूपेणारो
हति जायते तस्यापि कार्यजातस्य सत्तास्फुरणप्रदत्वेनाधिष्ठानत्वादीशानो नियंता परमेश्वर एव अथवा पु
रुषः तत्र मायारूपान्नेनातिरोहति स्वाविपरीतधियपदादिकार्यरूपेण रोहति जायते स एवामृतत्वस्येशान इ
त्यन्वयः। ईश्वरस्य सर्वकार्यकरणेषु प्रत्यग्रूपेणावस्थानं स्वस्थानं सर्वात्मकतां चाह। ॥ सर्वतः पाणिपादं तत्सर्वतो
क्षिशिरोमुखं सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठतीति। आब्रह्मस्तंबपर्यंतानां सर्वेषां तस्यैव पाणिपादादि इति
सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखमित्यस्यापि एवमेव विग्रहः सर्वतः श्रुतिमच्छ्रवणव

छोके सर्वमावृत्य तिष्ठतीति किं बहुना प्रकृतमाकृतं सर्वमंतर्बहिश्चास्य रूपस्फुरणप्रदतया आवृत्य समंता
द्व्याप्य तिष्ठति मायावी वस्य मायानिर्मितव्याघ्रहस्त्यश्वरथादीनि वस्य पंचभूतकार्याचिन्मात्रैकरसस्येश्वरस्य
निखिलकार्यकरणेषु प्रत्यग्रूपेणावस्थानं सर्वेंद्रियेषु साक्षित्वं निःसंगता सर्वनियंतृत्वादीनि चोक्तानि
। सर्वेंद्रियगुणाभासं सर्वेंद्रियविवर्जितं। सर्वस्य प्रभुमीशानं सर्वस्य शरणं सुहृदिति ॥१७॥ सर्वेंद्रियगुणाभासं सर्वा
णींद्रियाणि श्रोत्रादीनि वागादीनि च तद्गुणाः श्रवणादिवचनादि तद्वत्तेयः शब्दादि वेदनानि तद्विषयाश्च तद्गुणास्तेषां
इंद्रियाणां तद्गुणानां च सर्वेषामाभासत्वेनावस्थितं सर्वेंद्रियविवर्जितं निःसंगकूटस्थसंविन्मात्रसारतया स्वरूपाप्र
तीइंद्रियतद्वृत्तितद्विषयैः सर्वैः कल्पितादात्म्यादिसंबंधशून्यं इंद्रियनिर्ति एवमीक्षितानामुपलक्षणं सर्वस्य प्रभुं अध्या
रोपाधिदेवादिभेदभिन्नस्य प्रभुं स्वामिनं ईशानं नियंतारं स्वामित्वनियंतृत्वे अन्योन्यनपि नापि भवतः इत्युभयोरु
पादानं सर्वस्य शरणं सर्वस्यापदि प्राप्ये रक्षकं य सुहृदं मित्रं बलिनत्रैसर्वावस्थापादितं करं सर्वाणि पदानि प्रथ
मांतानि नपुंसकानि प्रभुमन्यत्र लिंगविपर्ययो दृष्टव्यः ग्रंथल्काघेवा बुद्धिल्काघर्यं प्रयोजनमाश्रयणीयं इतीहि
न्यायादस्यार्थस्य दुरवगाह्यत्वादस्यासस्यतां स्वयं लिंगमत्या बुद्धीश्वरयोरेकत्वं बहुधा लोपदिश्यते स्वमाया
ऽनंतो नियंता इत्याह। ।नवद्वारे पुरे देही हंसो लेलायते बहिः। वशी सर्वस्य लोकस्य स्थावरस्य चरस्य च। ध्यान
वद्वारे पुरे देही। देहस्य हेयत्वेनोपेक्ष्यत्वसिद्ध्यर्थमाह। नवद्वार इति शिरसि सप्त द्वाराणि द्वायवौ कायिमानि नवद्वाराणि
यस्मिन्नवद्वारे पुरे उपभोगस्थाने शरीरे तु प्रविश्य देही प्रत्यगभिमानी सन् हंसः जाग्रदभिमानं हित्वा स्वप्नाभा
भिमानं गच्छति तदपि हित्वा सुषुप्तिं गच्छति तामपि सम्यग्ज्ञानेन हित्वा तुरीयं गच्छतीति हंसः परमात्मा लेलायते स्य

मायये व ज्ञानक्रियाशक्तिमत्सूक्ष्मशरीरं संसृष्टा तदभिमानी सन् पुण्यपापे कृत्वा तत्परवशो भूत्वावस्थात्रयेष्विहलोक
परलोकेषु ब्रह्मादिस्तम्बपर्यन्तेषु योनिभेदेषु वर्त्तमानः प्रतीयते चलति संसरति बहिरसंगत्वात्तेभ्यः सदा बहिरेव अखं
डमायोपाधिकत्वेन महाकाशस्थानीयः परमेश्वरो वशी नियन्ता सर्वस्य महदादिभेदभिन्नस्य लोकस्य द्रव्यजातस्य
सर्वस्य स्थावरादिलोकस्य वा स्थावरस्य चरिष्णोर्जङ्गमात्मप्राणिभेदस्य च वशी। अतः सर्वकारणभूतस्येश्वरस्य सर्वा
विद्यया पाण्यादिकरणवत्त्वं तद्व्यापारवत्त्वं सर्वकर्तृत्वमनन्यवेद्यतामद्वितीयतां चाह। ।अपाणिपादो जवनो ग्र
हीता पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तं ।१९। निर्विशेषत्वादीश्व
रः स्वयमपाणिपादः पाणिपादा अस्य न विद्यन्त इत्यपाणिपादः तथापि जवनः गृहीता च ज्ञाता ज्ञातसाक्षित्वेन तत्र तत्र
गच्छतीव भातीति जवनः ईश्वरसत्ताव्याप्तिरेकेणास्य सर्वस्य सत्ताभावात् स्वाविद्याकल्पितस्य सत्ताप्रदत्वेन स्वात्मदे
न ग्राहकत्वात् गृहीता च इतरकर्मेन्द्रियाणामप्युपलक्षणमेतत्। पश्यत्यचक्षुः स्वयमचक्षुः अन्योपि चक्षुस्तद्वृत्ति
तद्विषयस्वरूपानुभवेन पश्यति। स शृणोत्यकर्णः स्वतः श्रोत्रहीनोपि श्रोत्रतद्वृत्तितद्विषयाणां स्वरूपानुभ
वेन शृणोतीत्युच्यते इतरेन्द्रियाणामप्युपलक्षणमेतत्। स वेत्ति वेद्यं किं बहुना सः अखण्डसंवित्स्वरूपं
प्रकाशविदेकरसः परमात्मा वेत्ति जानाति यावद्वेद्यं वेदनार्हं ज्ञेयं तद्धि शेषरूपं सर्वस्य सन्निधिसत्तामात्रेण जाना
ति ग्राहकत्वेन चक्षुरादीनामप्यन्यो ग्राहको दृष्टश्चेत्तस्यापि अन्यो ग्राहक एष्टव्यस्तस्याप्यन्यस्तस्याप्यन्य इत्य
नवस्था स्यादतो न किंचिद्विशिष्टो दिश्यास्त्वं पश्य मनश्चक्षुरादीनां ग्राहकत्वान्न ग्राहकान्तरापेक्षा किंतु दृश्यत्वादी
श्वरस्य तु स्वयंप्रकाशविदेकरसत्वात्सर्वसाक्षित्वाच्च न तस्य ग्राहकान्तरापेक्षेत्याह न च तस्यास्ति वेत्तेति सर्व

शमस्य प्रयोजनं सर्वाधिष्ठानत्वेन सर्वकारणत्वेन सर्वज्ञत्वं सिद्धं कालतो नवच्छिन्नं इति यावत् सर्वेषां प्रधान
त्वाद्वाग्र्यं पुरुषं पुरिशयनात् पूर्णत्वाद्वा पुरुषं महान्तं स्वव्यतिरिक्तवस्त्वभावाद्वस्तुतो नवच्छिन्नमित्थमा
हुर्वदन्ति ब्रह्मविदः। परमात्मना अद्वितीयत्वं प्रत्यक्त्वेनावस्थानेनैकत्वज्ञानान्मोक्षं ज्ञानाधिकारिणं चाह।
। ।अणोरणीयान्महतो महीयानात्मा गुहायां निहितोस्य जन्तोः। तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महि
मानमीशं।२०। अणोरणीयान् सूक्ष्मादपि सूक्ष्मतरः महतो महीयान् आकाशादेरपि महत्तरः अद्वितीयोऽणिमे
त्यर्थः आत्मा पश्चाज्ञातीत्यादिलक्षणस्तस्मादात्मा गुहायां सूक्ष्मशरीराख्यस्य गुहायां निहितः प्रत्यक्त्वेनाक्कि
तोहमित्यर्थः अस्य चक्षुरादिकरणग्रामत्वेन सन्निहितस्य जन्तोः जननधर्मयुक्तस्य स्थूलशरीरस्य गुहायामित्यन्य
पः। तं प्रत्यगात्मानं अक्रतुं विषयभोगसंकल्परहितं अस्य जन्तोः संसारिणं इत्यर्थः पश्यति साक्षीकरोति केन रूपेणम
हिमानं निरवग्रहं महत्त्वं ब्रह्मत्वाद्यर्थमिति यावत् यद्वा सर्वतो निरपेक्षं पदार्थस्तत्त्वं प्रत्यगात्मानं तत्पदार्थतत्त्वाद्वि
तीयेश्वरत्वेन यदा पश्यति तदा वीतशोकः शोकादिसंसाररहितो भवतीत्यर्थः कुतः साधनात् पश्यति धातुः प्रसादा
रजातायेकेयतुनां। इंद्रियाणि धातवः शरीरस्य धारणात् तेषां प्रसादाद्विषयरूपं उपरतं स्वलाभस्थाने स्थितमनाकृष्य
माणत्वलक्षणान्मनसः प्रत्यक्प्रावण्यलक्षणाच्च प्रसादात् पश्यति। उक्तमर्थं द्रढयितुं मंत्रद्रष्टानुभवमाह। ।वे
दाहमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात्। जन्मनिरोधं प्रवदन्ति यस्य ब्रह्मवादिनो हि प्रवदन्ति नित्यं।२१। वे
रजाने अहं मंत्रद्रष्टा आचार्यपदारूढः एतं सर्वोपाध्याकोपायामनेन च प्रतिपादितं अजरं अपक्षयरहितं पुराणं पु १९
पि राणं च इति पुराणं जन्मवृध्यादिरहितं अजरं पुराणं कूटस्थं नित्यमिति यावत् सर्वात्मानं सर्वेषामात्मानं सर्वे
षामात्मा स्वरूपमिति यावत् सर्वात्मानं स्वतो नवच्छिन्नमिति यावत् तं सर्वात्मानं सर्वगतं सर्वव्यापिनं व्यापित्वा

व्याप्यं स्यात् तत्त्वं न स्त यतिकिंत्वे तत्कार्यमित्याह यच्चुत्वादिति आकाशादिविविधकार्यरूपेण सर्वतीति विभुस्तस्मा
त्सर्वगतश्च शिव इत्यन्वयः। जन्मनिरोधं प्रवदन्ति यस्य जन्मजगन्निरोधं संहृतिं यस्य परमेश्वरस्य कूर्मेति ब्रह्म
वादिनस्तत्त्वदर्शिनः हि प्रसिद्धौ प्रवदन्ति नित्यं महाप्रलयमहासर्गं अवान्तरप्रलयावान्तरसर्गौ सुषुप्तिप्रबोध
मध्ये वा अथवा जन्मनिरोधं जन्माभावं यस्य वदन्ति नित्यमहं वेदेत्यन्वयः। सर्वमप्रतिपादितमित्यभिप्रायः। २१
श्वेताश्वतरोपनिषद्विवरणे तृतीयोऽध्यायः। । य एको वर्णो बहुधा शक्तियोगाद्वर्णाननेकान्निहितार्थो दधाति। वि
चैति चान्ते विश्वमादौ स देवः स नो बुद्ध्या शुभया संयुनक्तु। यस्य एकः स्वरूपप्रकाशश्चिदेकरसः एकः अद्वितीयः अवर्णः
वर्ण्यतेऽनेनेति वर्णो नाम तेन शून्यः वर्ण्यते इति वर्ण्यः रूपं तेन शून्यः नामरूपशून्य इत्यर्थः। बहुधा शक्तियोगाद्बहु
प्रकारकार्यविषयमायाशक्तियोगाद्वर्णाद्वर्ण्यतेऽनेनेति वर्णो ध्वन्यात्मा वर्ण्यत इति वर्णा रूपाणि अनेकान् अनेक
प्रकारान् स्वार्थान् नितियावत् निहितोऽर्थो यस्य स्वदृष्ट्या विषयेक्षणे निहितः निक्षिप्तः अर्थः अर्थ्यत इति अर्थोऽ
नभिधेयरूपं अर्थ्यतेऽनेनेति अर्थोऽभिधानं संनिहितार्थो दधाति करोति व्याकरोति सर्वस्येक्षणेन नामरूपव्या
करणं कृत्वा पश्चाद्बहिर्व्याकरोतीत्यर्थः। वि चैति चान्ते संहारकाले व्येति च अन्तर्भावितण्यर्थो अपचाद्यः
विषापयतीति विश्लेषयतीति सर्वस्यास्य निजोपसंहरतीति च आदौ विश्वस्य दधातीत्यनेन सर्वेण संबन्धः चकारस्यापि
तत्र संबन्धो द्रष्टव्यः आदौ सर्गप्रमुखे दधातीत्यन्वयः उत्पत्तिस्थितिलयकारणत्वधर्मेणोपलक्षितो यः स
देवो द्योतनस्वभावः स्वयंप्रकाशात्मचिदेकरस इति यावत् स नो बुद्ध्या शुभया संयुनक्तु स एव देवः नो अस्मा
न्नित्यवस्तुविवेकेहामुत्रार्थभोगविरागशमदमादिसाधनकलापयुमुमुक्षुत्वात्मसाधनवत्तुष्टयसंपन्नान् बु
द्ध्या अहं ब्रह्मास्मीत्यध्यवसायात्मिकया शुभया नान्तरीयकतया संसारतत्कारणानिनिवर्तकत्वेन तन्निरोधि
तानश्शास्त्रीयकया संयुनक्तु संयोजयतु अस्माय आधिदैविकोपाधीन्समष्टिरूपान्स्वदृष्ट्या तेषु प्रविश्य

न्यादित्याद्यात्मनावस्थितोपीश्वर एवेत्याह। ॥ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चंद्रमाः। तदेव शुक्रं तद्ब्रह्म
तदापस्तत्प्रजापतिः॥२॥ तदेवेश्वरतत्त्वमग्निसूर्यवाय्वाख्यं चंद्रादिरूपेणावस्थितं उक्तं अपि अस्य सर्वत्रानुच्यकार
श्यः। तदेव शुक्रं तद्ब्रह्म परो विराडात्मा ग्रमंडलं तेन रूपेणावस्थितं शुक्रमिति पाठे विराड्रूपेणापि तदेवास्थितमि
ति द्रष्टव्यं तद्ब्रह्म हिरण्यगर्भरूपेणापि तदेवास्थितं तदापः अबंतिमानि देवतारूपेणापि तदेवास्थितं तत्प्रजापतिः
हिरण्यगर्भविराड्ह चतुर्मुखरूपेणापि तदेवास्थितं। एष ब्रह्मैष इंद्र एष प्रजापतिरेते सर्वे देवा इत्यादिश्रुत्यं
तरात्। अग्निर्वाक्समष्टिरादित्यश्चक्षुः समष्टिर्वायुः प्राणः समष्टिश्चंद्रमा मनः समष्टिः शुक्रं विराट् स्थूलं समष्टिः
ब्रह्म हिरण्यगर्भः अंतःकरणं समष्टिः आपो जिह्वारूपसमष्टिः प्रजापतिरुपस्थेंद्रियसमष्टिरेतदग्न्यादिसमष्टि
ग्रहणमितरसमष्टीनामप्युपलक्षणं द्रष्टव्यं। स्वमायया व्यष्टिस्ततान्निरिच्छ कार्यकरणोपाधीन्स्वा
त्मसु घटप्रकाशवत्कुंडे चंद्रवच्च प्रतिबिंबपतनतया तत्तदात्मनावस्थितोपीश्वर एवेत्याह। ॥ त्वं स्त्री पुमानसि त्वं कु
मार उत वा कुमारी। त्वं जीर्णो दंडेन वंचसि त्वं जातो भवसि विश्वतोमुखः॥३॥ त्वमेव स्त्री पुंनपुंसकरूपेणा
वस्थितः स त्वं तत्तदात्मनावस्थितोसि उत वा कुमारीरूपेणापि स्थितः जीर्णः परिणतवयाः वलीपलिताद्युपेतः सि
तः सन्करकल्पितेन दंडेन वंचसि वंचन मनुष्यपतनेन तत्स्ततः पुनर्जातमसि त्वमेव किं परिमितजनः नेन त्वमे १७
व विश्वतोमुखः सर्वतोमुखो जातोसि हे परमेश्वर त्वमेव यस्य च्छाया नानाविधा कारणमायया जात इवैक
रूपसेऽस्य सर्वे तिर्यगादिरूपेणापीश्वरस्यैवावस्थानमाह। ॥ नीलः पतंगो हरितो लोहिताक्षस्तडिद्गर्भ
ऋतवः समुद्राः। अनादिमत्त्वं विभुत्वेन वर्तसे यतो जातानि भुवनानि विश्वा॥४॥ एवं मायया तिर्यक्का
र्यकरणानि सृष्ट्वा तेष्वनुप्रविश्य पायाः पिंगानुगतया क्रियया तत्तद्रूपं सज्जित्वा व्यवस्थितस्य मेवेत्याह। नीलः

पतंगः कृष्णपक्षी भ्रमरादिः सोपि त्वमेव हरितः शुकादिः सोपि त्वमेव तडिद्गर्भो मेघः सोपि त्वमेव ऋतवो वसं
तादयः षट् तेपि त्वमेव अनादिमत् आदिमन्न भवतीत्यनादिमत् कालतोऽनवच्छिन्नमित्यर्थः । तदपि त्वमेव यस
मुद्राः लवणोदयः समुद्रास्तेपि त्वमेव । त्वमिति सर्वत्र संबध्यते विभुत्वेन इत्थं व्याप्तीपादेशतोनवच्छिन्नत्वेनापि
त्वमेव वर्तसे विभुत्वेन वर्तमानं यत् तदपि त्वमेवेति च । यतो जातानि भुवनानि विश्वा यतो यस्माज्जातान्युत्पन्नानि भु
वनानि तदपि त्वमेवेति वा शरीराणि निखिलानि समस्तानि भुवनानि तेन त्वं नीलादिरूपेण वर्तसे इत्यन्वयः । यतो जा
तानि भुवनानि तदपि त्वमेवेति वा सर्वोपादानत्वात्स्वरूपतोप्यनवच्छिन्नं अनादिमदिति कालतोप्यनवच्छिन्न
त्वमुक्तं विभुत्वेनेति देशतोप्यानन्त्यं यत इति स्वरूपानन्त्यं । इदानीं तेजोबन्नलक्षणां प्रकृतिं छांदोग्योपनिषदुक्तां निखिल
प्रपंचस्य तद्विवर्त्ततामीश्वरास्तिन्नं प्रकृतिविवर्त्तरूपशरीरादिषु विषयेषु संगाद्यात्मनस्तस्याः संसारकारणतां तन्नि
वृत्तेर्मोक्षहेतुतां चाह ॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोनुशे
ते जहात्येनां भुक्तभोगामजोन्यः ॥५॥ न जायत इति अजा मूलप्रकृतिस्तां जन्मरहितमित्यर्थः । सर्वव्याप्यजात्मकत्वा
देकां लोहितशुक्लकृष्णां तेजः सृष्टात्तदवस्थापन्नत्वाल्लोहिता आपः सृष्टात्तदवस्थापन्नत्वाच्छुक्लां अन्नं नाथ वा
व्यां पृथिवी सृष्टा तदवस्थापन्नत्वात्कृष्णा अथवा लोहितां रजआत्मिकां शुक्लां सत्वात्मिकां कृष्णां तमआत्मिकां
त्वं लोहितशुक्लकृष्णां पुनरपि तामेवं विशिनष्टि बह्वीरिति बह्वीः । अनेकाः प्रविभक्तत्वात्कार्यरूपाः प्रजाः प्रविभ
क्तरूपेण जायन्त इति प्रजाः कारणात्मकत्वेनाविद्यमाना न स्यात्मनो जन्मासंभवादुत्पत्तेः प्रागविद्यमानं न जायते किं त
र्हि कारणात्मना विद्यमानमेव प्रविभक्तरूपेण व्यज्यते अतः प्रजा इत्युक्ताः ताः सृजमानामुत्पादयन्तीं सरूपाः समा
न रूपाः स्वेन लोहितशुक्लकृष्णात्मकत्वेन समानरूपाः सत्वरजस्तमआत्मकत्वेन वा समानरूपाः सृजमाना
मित्यन्वयः । अजः जन्मरहितः हि यस्मादेकः अनादिकालप्रवृत्ताविद्याकामकर्मपाशपाशितः क्षेत्रज्ञो यस्मात्सर्व
॥

तिपिवर्त्तत्वात्प्रकृत्यात्मकृत्वाधर्मादिविषयावस्थापन्नां प्रकृतिं दृष्यमाणः स्वयमानः तन्निमित्तभोगेषु क्रियमाण
श्चानुरोत्तेस्वयमनविकार्यसंगसुखसंविन्मात्रैकरसः परमात्मस्वरूपः स्वतः सर्वसंसारधर्मानास्कंदितः प्रकृतौ तद्वि
कारेन्नमयादिपंचकोशेषु जले चंद्रवदनुप्रविश्य तद्धर्मान्स्वधर्मत्वेन स्वीकृत्य प्रकृतिप्राकृताध्यानुरक्त्य श्रोते।
अनुवर्त्तते। जहाति त्यजति नाशयति अधर्मस्यजतीतियत्सम्यग्ज्ञानेन चिन्मात्रतया बाधनेएतौ सर्वस्य स्वर्ग
कारणभूतां मायाख्यां प्रकृतिं भुक्तभोगां भुक्तः संसारभोगो तेयथा साधुकृतो भोगानां भुक्तभोगां विकारित्यादिपक्षे
नसंसारभोगकर्त्ता। आत्मानिःसंगः सुखसंविन्मात्रैकरसः यान्नभोगकर्तृत्वनादिधर्मशून्ये न परस्वस्व
मियचलनादिधर्मयुक्तमुदर्कं चलनाध्यारोपणनिमित्तं यथा तद्वत्संसारधर्मानास्कंदितः संतोऽधिकारेऽ
नेनसुखसंविन्मात्रैकरसे आत्मनि अध्यस्ता सती सर्वसंसारधर्मारोपणनिमित्ता ततो नर्थरूपा नतां संसार
रोपणनिमित्तां अनर्थरूपां सम्यग्ज्ञानेन नाशयति अजः परमात्मस्वरूपत्वान्नजायते इत्यर्थः अन्यः प्रकृतितद्विका
रस्माक्षिका तेभ्यो अन्यः अहं ब्रह्मास्मीत्यपरोक्षीकृते कृत्वा प्रकृतितद्विकाराभ्यां दासिमानिनोन्यः। अहं ब्रह्मा
स्मीत्येकत्वादपरोक्ष्येण विद्वान्स्वतः प्रकृतिं त्यक्ता चिन्मात्रतया दहतीत्यर्थः। प्रत्यक्त्वाविलक्षणे ते निर्विशेषसुख
संविद्रूपात्माऽस्यंऽमायाविद्योपाधौ जले मार्तंडवदनुप्रविश्य तदुपाधिपरिकल्पितद्बिंबप्रतिबिंबवशेदं गत्वा
बिंबरूपेण संसारदोषानास्कंदितः स्वयंप्रकाशानवच्छिन्नस्वरूपसंविदा सर्वज्ञतया वर्त्तते द्युस्थबिंबभूतभास्करस्थ १८
चलनादिधर्मशून्यनिर्मलप्रकाशरूपेण सर्वप्रकाशकत्वेन वर्त्तते यथा तद्वदुपाधिस्तेनाविद्यापक्षपातिप्रतिबिंब
रूपेणोपाधिधर्मान्स्वधर्मत्वेन स्वीकृत्य पापादिमलकलुषितस्तत्फलभोक्तृत्वेन संसारीव वर्त्तते इति कारवद
कपोतस्थोपाधिपक्षपातितत्प्रतिबिंबरूपेण तद्धर्मांश्चलनादीननुसृत्य कलुषितत्वेन वर्त्तते यथा तद्वदित्याह।

त्वेन यदुक्तं त्वं महेश्वरं महांश्चासावीश्वरश्चेति महेश्वरस्तं अद्वितीयसुखचिन्मात्रवपुरीश्वरं मायिनं मायायाः स्व
रूपस्फुरणप्रदत्वेनाधिष्ठानत्वेनैवोपकारकं विद्यात् जानीयात् । यथा रज्जौ अस्य मायिनः परमेश्वरस्यावयवभूतैः
घटादिकार्यस्थानीयैरिदं जगत् व्याप्तं नीयैः सत्तास्फुरणैः शाकाद्यादिः सर्वमाकाशादिः स्फुरतीति व्याप्तं अथवा
स्तत्वेनैव व्याप्तिः न तु स्वपरिणामत्वेन अत्रापि तु शब्दो अवधारणे किं सर्वमिदं जगत् सर्वं चिदचित्सर्वमिदं जगत् अथवा
धवलमायायाः सत्तास्फुरणप्रदत्वेनाधिष्ठानं तु महेश्वरस्यावयवभूतैः तस्मिन् अध्यस्तैः तदेकदेशभूतैर्मायातत्सा
मर्थ्यैः स्तद्विवर्तत्वेनैव व्याप्तं सर्वमिदं जगत् तस्य पत्येके पठन्ति तस्मान्मायाविवर्तत्वात् सर्वस्य प्रपंचजातस्य सम्यग्दर्शने
न निवर्तयितुं योग्यत्वाद् द्वितीयेश्वरैकत्वज्ञानसिद्धये मुमुक्षुभिः प्रयत्नः कर्तव्यः इत्यभिप्रायः मायाख्यमूलयोनेः शाक
शाद्यवान्तरयोनीनां चाद्वितीयसुखचिन्मात्रवपुरीश्वरस्याधिष्ठातृत्वं मायामधिष्ठाय वियदाद्युत्पादिहेतुत्वं विय
दाद्यवान्तरयोनीर् वक्ष्यन्ते तदेवमुच्यते महेशस्तेन सर्वाधिष्ठात्रैश्वर्यरूपात् ब्रह्मात्मैकत्वज्ञानान्मोक्षसिद्धिं चाह ।
यः सुखचिन्मात्रवपुरीश्वरो योनिं योनिं वीप्सैषा मूलप्रकृतिं मायां वियदाद्यवान्तरप्रकृतीश्चाधितिष्ठति सत्तास्फुरणप्रदत्वेना
धिष्ठाय तिष्ठति । अथवा योनिं योनिं योनिः कारणं अस्य न विद्यत इत्ययोनिं योनिं प्रकृतिं अनादिसिद्धां प्रकृतिमिति यावत् अयोनिमू
ल प्रकृतिमधितिष्ठति अथवा योनिः स्थानं अध्यात्मादितत्त्वद्ध्यात्मादिस्थानमधितिष्ठति यमयति अंतर्यामिरूपेण अथवा २०
देवतिर्यङ्मनुष्यादिसरीसृपस्थावरजंगमादियोनिं योनिमधितिष्ठति हिरण्यगर्भादिरूपेण एको द्वितीयः । यस्मिन्मायाधिष्ठातरीश्व
रे सुखबोधवपुषि उपसंहारकाले सर्वमिदं जगत् समेति संगच्छते ऐक्यं याति व्येति च सृष्टिकाले विविधमेति वियदादिरूपेण
स्थास्यति कारणे विविधरूपेण तादात्म्यं प्रतिपद्यत इति चकारार्थः केचित्त्वेके पठन्ति तत्राप्ययमेवार्थः तमीशानं प्रशस्तमीश्वरं
यो योनिं योनिमधितिष्ठत्येको यस्मिन्निदं सं च वि चैति सर्वं । तमीशानं वरदं देवमीड्यं निचाय्येमां शान्तिमत्यन्तमेति । १२ ।
तं वरदं मोक्षपर्यंतानां वराणां दातारं द्योतनस्वभावं ज्ञानस्वरूपमीड्यं वेदेतिहासपुराणैः स्तुत्यं निश्चयेनाहमस्मीति सा

द्वा द्वौ यदाकाशमहाकाशाल्लीनौ षोडीवपरमात्मानौ सुपर्णौ शोभनपतनौ शोभनगमनौ सयुजा सयुजौ बिंबप्रतिबिंबभावेन
सदा संयुक्तौ सखाया सखायौ नित्योपकार्योपकारकत्वेन वर्तेते इति सखायौ समानाख्यौ नो समानाभिव्यक्तिकारणौ वा समानाख्यौ
येन तौ आदिना समानाख्यानौ वा समानं तत्सुखानुभूते शासनौ बिंबप्रतिबिंबभेदोपाधिकत्वेन बिंबित्वं सर्वकृत्वोपाधिकत्वेना
पम्यलिपित्वोपाधिकत्वे शुद्ध्यशुद्ध्युपाधिकत्वेन च समानं प्रकृतिप्रासक्तं वृक्षमुच्छेदधर्मवत्त्वाद्वृक्षं आश्रयो मादिवृक्षे दृष्टिन्तस्साक्ष
कृत्ताश्रयत्वात् पुण्यपापादि बहुबीजत्वात् सुखदुःखयोर्दिबहुफलत्वाच्च वृक्षं। परिषस्वजाते परिषक्तवन्तौ परिगृह्य वर्तेते नियम्यो
पाधित्वेन नियामकाधिकोपाधित्वेन च वृक्षं परिवर्तेते। तयोः कार्यकारणोपाधिकयोर्जीवेश्वरयोर्मध्ये अन्यः मायाकार्याहंकारा
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति॥५७
द्युपलिंगशरीराभिमानी जीवः पिप्पलं कर्मनिष्पन्नं सुखदुःखलक्षणं स्वादु विविधविचित्रविषयास्वादनं विषयसेवानिमि
त्तमित्यर्थः अत्ति उपभुंक्ते। अनश्नन्नन्यः प्रकृत्याख्यमायोपाधिको बिंबस्थानीय ईश्वरः कार्योपाधिकात्स्वप्रतिबिंबजीवा
दन्यः अनश्नन् कर्मफलमुपभुंजानः अभिचाकशीति सर्वमवेक्षतः पश्यन् सर्वसंसारधर्मशून्यस्स्वयं प्रकाशरूपेण इति मा
त्ररूपेणास्त इत्यावत्। स्वच्छबिंबभूतादित्यश्चलनादिधर्मशून्यप्रकाशरूपेण सर्वं प्रकाशन्नास्ते यथा तद्वदत्र स एष इह प्र
विष्ट आनखाग्रेभ्यः रूपं रूपं प्रतिरूपो बभूवेत्यादिश्रुत्यंतरात् जीवस्वरूपं परमात्मस्वरूपं चान्यत् परमात्मैकत्वज्ञानान्मोक्ष जीवस्य
सिद्धिमाह॥ समाने वृक्षे पुण्यपापलक्षणफलभोगायतने तस्मिन्समाने वृक्षे शरीरे उच्छेदन इति निर्वचनात् उच्छेदात्मके अवि
द्यातत्कार्यान्नमयादिपंचकोशेषु तद्धर्मेषु वाहं ममाभिमानपाशपाशितेन निमग्नः अनीशया शोचति मुह्यमानः मोहास्या
विद्ययातिरस्कृतप्रमाणसच्चिदानंदादिलक्षणेश्वरस्य निजरूपः अनीशया परमार्थतस्स्वयं सर्वसंसारधर्मानास्पदं इतीश्व
र एव सन्नविद्याच्छन्नेश्वरभावत्वादहं कर्ता भोक्ता सुखी दुःखी संसारी चेत्यनीश्वरतया शोचति संसारशोकमनुभ
समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥५८॥
वति जुष्टं यदा पश्यति जुष्टं हिरण्यगर्भादिभिः सेवितं सनकादियोगिभिश्च सेवितं अखंडसुखरूपत्वात्प्रियरूपं चान्यं जी

वादन्य इति श्रमग्रहीतमद्वितीयविः संग सुखबोधवपुष्ट्वेन परमार्थतः प्रकृतिप्राकृतेभ्योन्यमिति यदीशमीश्वरं महाहिं स्वा
दित्य स्थानीयं अस्य घटाकाश प्रतिबिंबादित्य स्थानीयस्य अन्य गात्मनो महिमानं अनवच्छिन्नसुखबोधवपुरीश्वर
एवं निजमहिमेति यदा पश्यति यदा साधनचतुष्टयसंपन्नो गुरुसन्निधौ यथावच्छ्रवण मनननिदिध्यासनान्यभ्य
स्य परस्यस्य परोक्षी करोति यदेति वचनात्तदेत्यध्याहर्त्तव्यं। तदा वीतशोक ईश्वरैक्यस्यापरोक्ष्येण ध्वस्तसंसारतत्कारणो भ
वतीत्यर्थः।। जीवेश्वरैकत्वज्ञानस्य प्रणाड्या साधनभूतेतकर्मोपासनानां साक्षात्साधनश्रवणादीनां प्रतिपादकवेदाना
मुपास्यत्वेन पष्टव्यत्वेन ब्रह्मविद्योपकारकदेवानां चेश्वराधीनरूपत्वयेश्वरे स्थितत्वमेतेरैक्यज्ञानाख्यमुपायमसा
ध्यं कर्मवेदयैवर्थ्यादिकत्वं ज्ञानान्मोक्षं चाह।

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधिविश्वे निषेदुः। यस्तं न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते।।८
ऋच इति सर्ववेदोपलक्षणं ऋगादिसर्ववेदा अक्षरे नक्षरतीत्यक्षरं सर्वमश्नुत इति वाक्षरं तस्मिन्नक्षरे परमे उत्कृष्टे
वस्तुतोनवच्छिन्ने व्योमन्व्योम्नि आकाशशब्दवाच्ये आकाशो वै नामरूपयोर्निर्वहिता इत्याकाशशब्दस्य परमात्मनि
प्रयोगदर्शनात् अथवा संगत्वाद्यविरोधेन सर्वतिरस्त्वेन वर्त्तमानत्वादाकाशाकृत्ये निषेदुः निषण्णाः आश्रिता ऋगा
दिप्रतिपादितकर्मोपासनाद्यनुष्ठापकैः शुद्धांतःकरणोत्पत्त्या पुनः ऋगाद्युपदिष्टाद्दर्शमदमाद्युपबृंहितश्रवणम
नननिदिध्यासनान्यनुष्ठापकैदक्षरशब्दवाच्यं परं ब्रह्मात्मत्वेन न वेद यस्तु श्रवणादेतस्त्रोध्याहर्त्तव्यः स किमृ
चा स्वाधीनेनर्गादिना किं प्रयोजनं करिष्यति न किमपि प्रयोजनं करिष्यतीत्यर्थः पाठमात्रस्यार्थय इद्विदुर्य ऋगाद्युप १८
दिष्टकर्मोपासनान्यनुष्ठाय तैः शुद्धांतःकरणाः साधनचतुष्टयसंपन्ना ऋगाद्युपदिष्टश्रवणाद्यनुष्ठाय इत्थं शास्त्रोपदि
ष्टप्रकारं तत्वमक्षरवाच्यं परंब्रह्मात्मत्वेन विदुरपरोक्षीकुर्युस्त इमे समासते सर्वोत्कृष्टसाधनानुष्ठायिनं इमे अहं ब्रह्मास्मी
त्यपरोक्षीकृतैकत्वाः संतः समासते उत्कृष्टसाधनपरंपरसाध्याहं ब्रह्मास्मीत्येकत्वदर्शनेन ध्वस्तसंसारतत्कारणाः

स्वरूपत्वेनाविस्मृतिनिरतिशयानंदरूपां सतेएवं तत्त्वतास्थितिः सम्यगासनं नाम देवः परमेश्वरः स्वमायाशक्त्या पुरुषार्थसाधनप्रतिपादकान्वेदांस्तत्प्रतिपाद्ययागादींस्तत्साध्यस्वर्गभविष्यद्वर्त्तमानरूपेण वर्त्तमानप्रपंचजातं च सृष्ट्वा स्वमायाशक्तिविवर्त्तसमष्टिव्यष्ट्यात्मककार्यकरणात्मकोपाधौ उक्तेचेद्बुद्ध्यनुप्रविश्य विद्याकामकर्मादिभिर्निरुद्धः सन् जीवाख्यां लभत इत्याह॥ छंदांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदंति। अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः॥ छंदांसि ऋग्यजुःसामाथर्वांगिरसः शाखावेदाः यज्ञा देवयज्ञादयो दानपर्यंताः क्रतवो ज्योतिष्टोमादयः अथ वा रूपसंबंधर्हिता विहितक्रियायज्ञाः तत्संबंधाः क्रियाः क्रतवः व्रतानि चांद्रायणादीनि नियमानि भूतमतीतं भव्यं भविष्यद्रूपं यान्यदपि वर्त्तमानं च वेदा वदंति यच्छब्दसाध्यत्वेन भूतभविष्यद्वर्त्तमानरूपेण वस्तु प्रपंचं वदंत्यस्मिन्नर्थे वेदा एव प्रमाणमित्यावदंति यच्छब्दस्य सर्वेषु प्रत्येकं संबंधो द्रष्टव्यः। अस्मात्प्रकृतादक्षराख्याद्ब्रह्मण एतत्सर्वं समुत्पद्यते इत्यर्थाह यकोऽधिनव्यं कथं कूटस्थस्य ब्रह्मणो जगदुपादानत्वमित्याशंकापाकाह। मायी सृजते विश्वमिति कूटस्थस्यापि मायोपाधिकत्वात्स्वमा मायाः शक्तिः यशः स्वस्यैव स्वरूपत्वमुपपन्नमिति पावद। एतदित्यस्मात् अस्मादित्यत्रान्वयो दृष्टितः तस्मिन्नस्मन्नधिव्यष्टिकार्यकरणात्मके विश्वप्रपंचे स एव मायया सन्निरुद्धः मायया निर्मिते तस्मिन्मायया सन्निरुद्धो बद्धो मायया अन्यः सन्परिवर्तते मायिमायोपाधिकः सन्नेतत्सर्वं विश्वं सृजते इति वेदा वदंति अस्माद्ब्रह्मणो मायया अन्यः सं तस्मिन्सन्निरुद्धो बद्ध इति व्यवहितेनान्वयः॥ पदे पदे ऽन्यत्पाठ गत्या सतेर्मायायास्तदधिष्ठानानंतसुखचिन्मात्रस्य परमेश्वरस्य निजरूपत्व प्रकृतिस्तु मायया तदेकदेशेश्वकार्यत्वेन सर्वस्य व्याप्यत्वं मायाधिष्ठानस्तानंतसुखचिन्मात्रपरमेश्वरेण तदेकदेशेष्वाविशेषत्वेन सर्वस्य व्याप्यत्वं चाह॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं। अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगदिति॥ अत्र तत्रजगत्प्रकृतित्वेनपोक्तां मायेयमिति विद्यात् ज्ञानी पारं तु शास्त्रोऽवधारणो तत्रे तत्रेश्व

न्यग्रोदन्तेनित्वाधितमस्थप्रकृत्याख्याऽविद्यातमस्यान्तत्तदा नदिवादिवाकल्पनापिनास्तिनरात्रिनरात्रिकल्पनापिआस्तिनस
रसद्भावकल्पनापिनास्तिनचासद्भावकल्पनापिनास्तितर्हिसर्वशून्यमेवतत्त्वेनप्राप्तमितिनेत्याहशिवएवकेवलइतिशि
वएवतत्त्वेनावस्थितः नशून्यमित्येवकारार्थः शिवः अविद्यादिमलास्पृष्टःसुखसंविद्रूपःकेवलः विद्ययाध्वस्तान्मूलकार
णतमस्यान्तन्मूलकदिवादिप्रभेदशून्यत्वाद्वितीयः तदक्षरं तदीश्वरतत्त्वमक्षरं नक्षरतीत्यक्षरंनित्यंनतद्ब्रह्मार्थस्तत्सवि
तुर्मंडलवर्तिसवितुरपिवरेण्यमितिवा सवितुः स्थावरजंगमात्मकस्य जगत उत्पादयितुर्मुमुक्षुभिः प्रार्थनीयं निर्गुणं यथे
ष्टरूपमितिवावरेण्यं वरणीयं सर्वभजनीयरूपं च प्रज्ञाया अविद्यातत्कार्यद्वैतदाहनिमित्ता अहं ब्रह्मास्मीत्येकत्ववि
द्यालक्षणप्रज्ञा च तस्माच्छिवाद्बोद्धुः प्रसृता साधनचतुष्टयसंपन्नयोग्याधिकारिषु प्रसृता पुराणी आविरिंच्या संप्रदायप
यदातमस्तन्नदिवानरात्रिर्नसन्नचासच्छिवएवकेवलः। तदक्षरंतत्सवितुर्वरेण्यंप्रज्ञाचतस्मात्प्रसृतापुराणी ७०।
रंपरयाआगता अथवा पदप्रत्ययाद्यवस्थायां तमः नासदासीन्नो सदासीत्तम आसीदितिहि श्रुत्यन्तरोक्तं आसीदि
दंतमोभूतमितिस्मृत्युक्तं च यत्तमस्तदेवावशिष्टं तदानीं महदादिसर्वकार्यजातस्य मूलप्रकृतितमोमात्रं तयापि विलया
वस्थायांदिवादिप्रभेदोनास्ति इदंसदिदमसदयंभावोयमभाव इत्यपिभेदोनास्ति तावन्मात्रतयाग्रस्तसमस्तविशेषे
तमोपिशिवएवशिवान्नभेदेनावस्थितं अतः शिवः केवलस्तस्यामवस्थायामद्वितीयत्वेनावस्थितः तच्छिवः तच्चमक्षरंनक्ष २२
रतीत्यक्षरंमहाप्रलयादावपिस्थितत्वान्नित्यं तत्तच्छब्दार्थस्थले सवितुः सर्वस्य प्रसवितुः वरेण्यमुपास्यमेववरणीयंस्वरू
पंचप्रज्ञा च त्रयीलक्षणाविद्या तस्माच्छिवतत्त्वात्प्रसृता पुरुषनिःश्वासवन्निर्मिता पुराणी अनादिसिद्धानिपतत्क्रमस्य
शादिविशिष्टा सर्वदेति यावत्। परमेश्वरस्य सर्वतोनवग्रहाद्वितीयत्वपुष्टमद्वितीयसुखैकरसत्वात्केनाप्यनुपमेयत्वादि
क्कालाद्यनवच्छिन्नपरोनामत्यंचाह। एवंप्रकृतंशिवमूर्ध्वंनित्यत्वान्नकश्चिदपिपरिजग्रभत्। नपर्यग्रहीन्नपरि
ग्रहीतुंनशक्नुयान्नमध्येनिरंतरत्वाद्द्वितीयत्वाच्चमध्यस्थानाभावात् नमध्येपिकश्चिदपिपर्यग्रहीन्ततस्यप्रतिमा

सान्क्रते सेमां शांतिं सुबुद्धिप्रत्ययादेः सर्वसंहारोपलक्षणया शांतिः प्रसिद्धा तामिमां सर्वसंहारोपलक्षणां शांतिं सम्यग्ज्ञाने
न मूलाविद्यादाहाद् इत्थं तां पुनरावृत्तिरहितां मे तिष्ठ कस्त्वज्ञानेन ध्वस्तसंसारकारणो ऽवनीत्यर्थः। हिरण्यगर्भं प्रति प्रसादा
भिमुखं परमेश्वरं प्रति सम्यग्ज्ञानप्रार्थनमाह उक्तार्थो मंत्रः पतपतापस्य तव्यत्ययेनास्मिन्नेपदं बहुवचं छंदस्यमाऽयो
गोविंदस्वामि- अर्थान्तरसर्गस्थितिप्रलयकर्तृत्वेन वेदप्रवर्त्तकत्वेन च निरीक्षणं स्तुतवानित्यर्थः विश्वाधिपो देव इत्येके प
ठंति यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः। हिरण्यगर्भं पश्यत जायमानं स नो बुद्ध्या शुभया संयुनक्तु ।६३
हिरण्यगर्भादिदेवान् प्रति स्वामित्वं भूरादिलोकान् प्रत्याश्रयत्वं व्यष्टिजीवान् प्रति नियंतृत्वं अंतःकरणशुद्धिद्वारेण
सम्यग्ज्ञानाधिकारसिद्ध्यर्थं मुमुक्षुभिराराध्यत्वं चेश्वरस्याह।४ यो देवानां यः प्रकृतः परमेश्वरो देवानां समष्टिरू
पाणं देवानामधिपः स्वामी समष्टिकार्योपाधिकान् हिरण्यगर्भादीन् मूलकारणोपाधिकः ईश्वरः स्वामी यस्मिन्परमेश्वरे
सर्वकारणे लोकाः भूरादिलोकाः लोक्यंत इति लोका दृश्यभूताः सर्वे पदार्थाः अधिश्रिताः ओतप्रोतत्वेनाधिउपाश्रिताः यः
कारणोपाधिकः परमेश्वर ईशे ईष्टे तकारलोपश्छांदसः अस्य द्विपदः व्यष्ट्युपाध्यभिमानिनो मनुष्यादेः चतुष्पदो व्यष्ट्युपाध्य
भिमानिनः पश्वादेश्च कस्मै कायसुखरूपाय छांदसः स्मै भावः देवाय द्योतनस्वभावाय यद्वा द्युसंयोगात् तद्धेतोर्ध्याहर्त्तव्यः त
स्मै सुखसंवित्स्वरूपायेत्यर्थः। तस्मा इति केचित्पठंति तस्मिन्पाठे त्रेण सुखस्वभावायेत्यर्थः। हविषा तत्साधनसाधनभूतद्र
यो देवानामधिपो यस्मिंल्लोका अधिश्रिताः। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥६४।
व्यैश्च पुरोडाशादिभिः विधेम परिचरेम विधेः परिचरणकर्मणस्तद्रूपं। ईश्वरस्य परमसूक्ष्मत्वं संसारचक्रमध्ये साक्षि
त्वेनावच्छिन्नत्वं सर्वजगत्स्रष्टृत्वं सर्वात्मकत्वमीश्वरैकत्वज्ञानान्मोक्षसिद्धिं च तदर्थं जातम सकृदुक्तमप्याह ग्रंथलाघवा
बुद्धिलाघवं प्रयोजनमपेक्षितव्यमिति न्यायमाश्रित्याह।१ सूक्ष्मातिसूक्ष्मं भूतानि सूक्ष्माणि तेभ्योप्युत्तरोत्तरात्पूर्वं पूर्वं
सूक्ष्मं तत स्तन्मात्राणि सूक्ष्माणि तेभ्योप्युत्तरोत्तरात्सर्वं दृश्यं सूक्ष्मं तेभ्यो महत्तत्त्वं तद्वाव्यक्तीक्षणं सूक्ष्मं तस्मादपि प्रकृतिः सू

स्मात्प्रकृतेरपि स्वयंप्रकाशत्वादेकरसत्वपुरीश्वरः सूक्ष्ममिति सूक्ष्मातिसूक्ष्मं कलिलस्य प्रसूतिप्राकृतात्मकस्य संसारदुर्गस्य गहनस्य मध्ये अंतः साक्षित्वेनावस्थितं विश्वस्य स्रष्टारं विश्वस्यांतर्भौतिकप्रपंचजातस्य स्रष्टारं तत्तच्छब्दवाच्यभूतमनेकरूपं नानाविधजन्मपात्रेषु यद्वद्ब्रह्मादिपिपीलिकांतेषु समष्टिव्यष्टिरूपकार्यकरणोपाधिभूतेनैकरूपेणावभासमानं विश्वस्य मायातद्विवर्तात्मकस्यैकमद्वितीयं परिवेष्टितारं शिवं निःसंगत्वात्प्रकृतिशक्तिश्रमवर्जितं स्वानंदितानंतसुखसंविन्मात्ररूपं ज्ञात्वाहमस्मीत्यपरोक्षीकृत्य शांतिमत्यंतमेतीति व्याख्यातमेतत् ॥

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपं । विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शांतिमत्यंतमेति ॥ १५ ॥

ईश्वरस्य सर्वपोषकत्वं सर्वस्वामित्वं समष्टिव्यष्टिरूपकार्यकरणोपाधिषु प्रत्यग्रूपेणावस्थितत्वं सनकसनंदनवामदेवादिभिर्हिरण्यगर्भाद्यधिकारिपुरुषैश्च परमेश्वरैकत्वेन प्राप्तत्वं इतरस्यापि साधनचतुष्टयसंपन्नस्य योग्याधिकारिण ईश्वरैकत्वज्ञानान्मोक्षसिद्धिं चाह ॥ स एव प्रस्तुतः परमेश्वरः पूर्वकल्पेषु जीवैः संचितकर्मपाककाले भुवनस्य गोप्ता रक्षिता भुवनस्य कर्मानुगुणतया आनंदप्रदातृत्वेन रक्षिता विश्वाधिपः अध्यात्मादिभेदभिन्नस्य विश्वस्य स्वामी सर्वभूतेषु गूढः ब्रह्मादिस्तंबपर्यंतेषु समष्टिव्यष्ट्यात्मकेषु सर्वभूतेषु घनुप्रविष्टः अद्वितीयानंदानुभवरूपेण गूढः संवृतः केवलसाक्षिमात्ररूपेण वर्तते यस्मिन्नपास्ताशेषविशेषे आनंदसुखचिन्मात्ररसे ईश्वरे युक्ता एकतामापन्नाः ब्रह्मर्षयः सनकादयः देवताश्च हिरण्यगर्भादयः तमेवं ज्ञात्वा तमीश्वरमेवमुक्तप्रकारेणाहमस्मीति ज्ञात्वा अपरोक्षीकृत्य मृत्युपाशान् छिनत्ति मृत्युर्वै तम इति श्रुतेर्मूलप्रकृतिर्मृत्युः

स एव काले भुवनस्य गोप्ता विश्वाधिपः सर्वभूतेषु गूढः । यस्मिन्युक्ता ब्रह्मर्षयो देवताश्च तमेवं ज्ञात्वा मृत्युपाशांश्छिनत्ति ॥ (१६) २१

मृत्युं तद्विवर्तरूपाविद्याकामकर्मात्मकान् पाशान् छिनत्ति नाशयति यत्परज्ञानाग्निना दहतीत्यर्थः ॥ ईश्वरस्य परमसूक्ष्मत्वं निरतिशयानंदस्वभावत्वं सर्वदोषरहितत्वं समष्टिव्यष्ट्यात्मककार्यकारणसंघातेषु जीवरूपेण गूढतया स्थितत्वं सर्वस्य स्वरूपस्फुरणप्रदत्वेन व्याप्तत्वं ईश्वरैकत्वज्ञानात्सर्वपाशापहानिं चाह ॥ पुरुषार्थरूपेणापरमसूक्ष्मत्वमाह । घृतात्परमिति ।

घृतात्परमुपरि वर्त्तमानं मंडं सूक्ष्मं प्रीतिविषयं च यथा तद्वन्मुमुक्षुः प्रीतिविषयं अतिसूक्ष्मं च व्यष्टिभूतेभ्यो विश्वाख्य वि
राड्रूपं सूक्ष्मं तस्मात्तैजसाख्यं हिरण्यगर्भरूपं सूक्ष्मं तस्मात्साक्षाद्भूता प्रकृतिरूपं सूक्ष्मं तस्मादंतर्यामिरूपं सूक्ष्मं तस्मादपास्तस
मस्तविषयानंतसत्यसुखचिन्मात्रं सूक्ष्ममेवमतिसूक्ष्मं ज्ञात्वा शिवं अविद्याकामकर्मादिमध्ये स्रष्टारं ब्रह्मादिस्तंबपर्यंतेषु समस
ष्टिव्यष्ट्यात्मकसर्वभूतेष्वनुप्रविश्य तैर्गूढं तिरस्कृतेश्वरस्वभावं विश्वस्य प्रकृतिप्राकृतात्मकस्यैकमद्वितीयं सर्पादिरज्ज्वादिरि
व॥ घृतात्परं मंडमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढं। विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः।१८।
परिवेष्टितारं स्वरूपप्रदत्तया परितो वेष्टितारं देवं द्योतनस्वभावं चिन्मात्ररूपं ज्ञात्वा अहमस्मीति ज्ञात्वा साक्षात्कृत्य मुच्य
ते सर्वपाशैः प्रकृतिप्राकृतात्मकैः संसारपाशैर्मुच्यते अहं ब्रह्मास्मीत्येकत्वदर्शनेन बाधिताविद्यातत्कार्यसंसारपाशो
भवतीत्यर्थः। अद्वितीयसुखचिन्मात्रवपुरात्मनो महदादिप्रपंचरूपेणावस्थानं महाकाशस्थानीयपरमात्मरूपेणावस्था
नं संस्कृतमतिगम्यत्वं तदेकत्वज्ञानान्मोक्षसिद्धिं चाह। एष प्रकृतो देवः अनंतसुखचिन्मात्रैकरसः विश्वकर्मा विश्वंमहदा
दिकं कर्म क्रियत इति कर्म कार्यं मायावष्टंभाद्विश्वं कार्यं अस्येति विश्वकर्मा। महात्मा महांश्चासावात्मेति महात्मा महाका
शस्थानीयपरमात्मरूपेणापि सर्वदा वर्त्तत इति यावत्। हृदा हृञ् हरणे इति स्मरणाद्धरतीति हृत् तद् हृदा नेति नेतीति निषेधो
पदेशेन मनीषा इदं परमार्थमिदं अपरमार्थमयमात्मायमनात्मेत्यादिविचारबुद्ध्या मनसा हि ब्रह्मास्मीत्येकत्वज्ञानेना
एष देवो विश्वकर्मा महात्मा सदा जनानां हृदये संनिविष्टः। हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवंति।१९।
भिक्लृप्तोऽभिप्रकाशितः अद्वितीयतया आत्मतया आत्मत्वेनाभिव्यक्तो भवतीत्यर्थः। ये शमादिसंपन्नाः अनंतसुखचिन्मा
त्रैकरसं तत्पदार्थभूतं पूर्वोक्तमीश्वरमेव त्वंपदार्थभूतं प्रत्यगात्मत्वेन विदुरपरोक्षीकुर्युस्तेऽपरोक्षज्ञानवंतोऽमृता भ
वंति नित्यसिद्धस्वरूपा एव भवंतीति। प्रत्युताद्वैते मोक्षे चेश्वरस्याद्वितीयत्वावधारणादितरस्मिन्कालेऽपि स्वात्मा सद्वितीया
स्य प्रतिभासः परमार्थतः सदाद्वैतमनन्यत्वमेवेत्याह। यदा यस्यां विद्यावस्थायां अतमः न तमः अस्येत्यतमः शिवतत्वस

र तद्बीजोपशमनं नित्यं यथा भवति तथा पाहीत्यर्थः प्रपद्यत इति केचित् अस्मिन्पक्षे अन्योपि मुमुक्षुः कश्चिन्मोक्षसिध्यर्थं त्वामेव प्र
पद्यते अतोहमपि मोक्षसिध्यर्थं त्वामेव प्रपद्ये इत्यध्याहारेण चयः। अस्मच्छिष्य प्रशिष्याः कार्यकारणानि सम्यग्ज्ञानापोययत्नेन माहिं
सीः यो भ्यां रंध्यान्येव कुर्विति ईश्वरं प्रार्थनामाह। मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मा नो रुद्र भा
मितो वधीर्हविष्मंतः सदमित्त्वा (प्रति) हवामहे ॥ अधुनः अस्माकं विदुषां संबंधिनि तोके पुत्रे शिष्ये तनये पौत्रे प्रशिष्ये वा मा न आ
यो आयुषि मा नो गोषु सम्यग्ज्ञानसाधनपरंपराप्रतिपादकेषु यवेदेषु मा नो अश्वेषु अश्वेष्विंद्रियेषु इंद्रियाणि हयानाहुरिति
श्रुतेः र रीरिष इति सुवत्र संबध्यते सर्वत्र सप्तमी विषयत्वेन दृष्टव्या तत्तद्विषयां हि सांमा कार्षीः रिषतिर्हिंसार्थे वीरान्मा नो रुद्र भा
मितो वधीर्वीरान्वीर्यवतः परिचारकान्स्मात्कान्नः अस्माकं संबंधिनः हे रुद्र भामितः भामः क्रोधस्तं इतस्तेरूपचारेण क्रोधितः
सन्न वधीः मा वधीरिति सर्वप्रतिषेधेन संबंधः हविष्मंतः सदमित्त्वा हवामहे एवं वा सम्यग्ज्ञानेन योग्यत्वसिध्यर्थं वयं हविष्मंतस्त्वदा
राधनसाधनवंतो भूत्वा सदः सदा इत्यु एव सर्वदा त्वां हवामहे पृच्छामहे रक्षणार्थं माकृपामहे इति वा अथवा न केवलं निःश्रेयसा
र्थिभिरेवाहं प्रार्थ्यः किंतर्हि अभ्युदयार्थिभिरपीत्याह मा नस्तोक इति हे रुद्र नोऽस्माकं संबंधिनि तोके पुत्रे तनये पौत्रे च नाशीरि भः
तद्विषयां हिंसां मा कार्षीः मा न आयौ आयुषि मा नो गोषु मा न अश्वादिषु तथा न अस्माकं वीरान् वि भामितः क्रोधितस्ते रपचारे
णक्रोधितोपि मा वधीः वयं हविष्मंतो भूत्वा सह इत्यर्थः सदेव त्वा हवामहे रक्षणार्थं माकृपामः। इति श्रीमत्परमहंसपरिव्राजका
कार्यश्रीमदानंदात्मपूज्यपादशिष्यस्य विज्ञानात्मभगवतः कृतौ श्वेताश्वतरोपनिषद्विवरणे चतुर्थोऽध्यायः। ॥ विद्याविद्ययोः परमे
श्वर तत्त्वं च न विद्यास्वरूपं विद्यास्वरूपं परमेश्वरस्याह॥ द्वे अक्षरे ब्रह्मपरे त्वनंते विद्याविद्ये निहिते यत्र गूढे। क्षरं त्वविद्या ह्यमृतं तु विद्या वि
द्याविद्ये ईशते यस्तु सोन्यः॥ इति द्वे विद्याविद्ये अक्षरे न क्षरतीत्यक्षरं सर्वं अश्नुत इति वाक्षरं अक्षरात्मके अक्षरे ब्रह्मपरे ब्रह्म २३
णो हिरण्यगर्भस्त्वपरे अथवा ब्रह्म च तत्परं येति ब्रह्मपरं तस्मिन्ब्रह्मपरे पर ब्रह्मणीति पाय रुखो हसः परनिपातः तु शब्दः अ
वधारणार्थः तस्मिन्परब्रह्मण्येवानंते द्वितीये विद्याविद्ये अक्षरे इति विरोधत्वेनोच्यते दर्शितः निहिते निक्षिप्ते स्थिते परमेश्वरा

चीनस्वरूपप्रतीतिर्नास्ति तालितरां तिष्ठते यत्र यस्मिन्नक्षरे स्वयंप्रकाशात्मस्वं सुखानुभूतित्वेनानभिव्यक्ते विद्याविद्ययोर्लक्षणमाह।
क्षरं त्विति। क्षरं त्वविद्या यद् क्षरं क्षरणहेतुस्तत्र ह्यविद्यैव तु न्याध्यो यथा रणार्थः हि यस्मात् दन्तं तु विद्यापय दन्तं तस्य साधनं तद्वि
द्यैव तु न्याध्योव धारणार्थः नित्यमोक्षपुरुषार्थप्रापकं यन्नु विद्यैव स्वर्गादि अनित्यफलहेतुः कर्मविद्या नित्यमोक्षपुरुषार्थहेतुः शमा
द्युपबृंहितश्रवणादिविद्या यस्मात् तस्मात् नित्यपुरुषार्थैर्मुमुक्षुभिः कर्माणि संन्यस्य शमाद्युपबृंहितश्रवणादिरेवाश्रयितव्य इत्यभिप्रा
यः। विद्याविद्ये ईशाते यस्त्वेवंभूते विद्याविद्ये ईशाते ईष्टे नियमयति यः परमेश्वरस्तु साक्षात्कार्थं यत्र विद्याविद्ये निहिते पश्य विद्या
विद्ये ईष्टे सोऽन्यः स ताभ्यामन्यः विद्याविद्ययोः स्वरूपप्रदतयाधिष्ठानत्वात् साक्षितया नियन्तृत्वाच्च ताभ्यामन्यः परमेश्वरस्य मूलप्रकृत्य
धिष्ठातृत्वं सर्वशरीराधिष्ठातृत्वं च यथा तथा प्रकृतीनामधिष्ठातृत्वं हिरण्यगर्भस्रष्टृत्वं तस्य विद्याप्रदातृत्वं चाह।

यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः। ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च प
श्येत्॥ २॥

यः स स्वसुखानुभूतिः परमेश्वरः अयोनिं योनिमनादिसिद्धां मायाख्यां मूलप्रकृतिं स्वसत्तास्फुरणप्रदत्वेनाधितिष्ठति एको
द्वितीयो विश्वानि सर्वाणि रूपाणि शरीराणि योनीश्च सर्वाधिपध दृष्टा समष्टिरूपा अवान्तरयोनीश्च सर्वाः सत्तास्फुरणप्रदत्वेनाधि
तिष्ठति ऋषिमप्रतिहतज्ञानं प्रसूतं स्वेनोत्पादितं कपिलं कनकवर्णं हिरण्यगर्भमिति यावत्। यः परमेश्वरोऽग्रे सृष्टिकाले ज्ञानैर्ध
र्मज्ञानवैराग्यैश्वर्यैर्वेदतदर्थपरिज्ञानैर्वा युक्तं बिभर्ति बभार तत्र जायमानं च पश्येत् ददर्श तत्सर्गस्थित्यं तत्कर्तृत्वेन वेदसंप्रदाय
कर्तृत्वेन च यः पश्येत् ददर्श स एव मुमुक्षुभिरात्मत्वेन ज्ञातव्य इति वाक्यशेषः अंतःकरणसमष्टिः प्राणसमष्टिः चक्षुरादिज्ञानेंद्रियस
मष्टिः वागादिकर्मेंद्रियसमष्टिश्च स्वमायया सृष्ट्वा तत्तदवस्थापन्नस्य परमेश्वरस्य तत्तद्दृष्टीनां स्रष्टृत्वं तत्तदुपाध्युपहितानां घटा
काशजलचंद्रस्थानीयानां हिरण्यगर्भप्रमुखानां जीवानां महाकाशार्कचंद्रस्थानीयस्य तस्येश्वरस्य कारणत्वं सर्वाधिपतित्वं चाह।

एकैकं जालं बहुधा विकुर्वन्नस्मिन् क्षेत्रे संहरत्येष देवः। भूयः सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुते महात्मा॥ ३॥ एकैकं जालं
समष्टिरूपं कार्यकरणाभिमुखमस्यानां बंधनत्वाज्जालवज्जालानि एकैकमंतःकरणसमष्टिरूपं ज्ञानेंद्रियसमष्टीनां एकैकं कर्मेंद्रि
यसमष्टीनां च मध्ये एकैकं जालं स्थूलसमष्टिरूपं च जालं तत्तज्जावस्थापन्नः सन् बहुधा विकुर्वन् तत्तत्कर्मोपासनानुगुणतया बहु

कार्यकरण

याथ अनंतव्यष्टिरूपं प्रकारेण विकुर्वन्नस्त्वविपरीतो येन सृष्टिकाळे विकुर्वन्नस्मिन्क्षेत्रे मूळप्रकृतिळक्षणे क्षेत्रे संहरति सर्वम
हाप्रळयादात्रेष जस्कृतो देवो द्योतनस्वभाव ईश्वरो योस्मिन्मायाख्ये क्षेत्रे सर्वं संहृतवांस्तस्मान्मूलकारणादेकैजालं बहुधा विकुर्व
न्नास्त इत्यर्थः पुनर्यो व्यष्टिसमष्टिरूपकार्यकरणोपाधीन्सृष्ट्वा अनंतरं पतयः पतीनां तु आर्यं समष्टिरूपकार्यकरणपतीन्स्वामिनो
हिरण्यगर्भपर्यंतान्सृष्ट्वाप्यानंतरमीशः ईश्वरः सर्वाधिपत्यमुपाधीनामुपहितानां सर्वेषामाधिपत्यं अधिपतित्वं नियंतृत्वं कुरु
तेमहात्मा महांश्चासावात्मा च महात्मेश्वरः परमेश्वरस्य सर्वज्ञस्याखंडस्य चवं प्रकाशबोधवपुष्ट्वं सर्वनियंतृत्वं चाह। ॥ ॥

सर्वा दिश ऊर्ध्वमधश्च तिर्यक्प्रकाशयन्भ्राजते यद्वनड्वान् । एवं स देवो भगवान्वरेण्यो योनिस्वभावानधितिष्ठत्येकः ॥४॥

सर्वा दिशः प्राच्याद्याश्च तस्यो दिशस्तद्वर्तिनः सर्वपदार्थाश्च ऊर्ध्वमूर्ध्वदिशां तद्वर्तिनः सर्वपदार्थाश्च अधश्चाधोदिशस्तद्वर्तिनः
सर्वानिति तिर्यक् प्रदिशाश्चतस्रस्तत्स्थान्सर्वपदार्थांश्च प्रकाशयन्स्वात्मचैतन्यज्योतिषा भासयन्भ्राजते अखंडस्वयंप्रकाशबो
धवपुष्ट्वेन दीप्यते यत् उ इत्यनर्थको निपातः यद्वत् यथेति यावत् अनड्वानादित्यः ऊगडः चंकूवहने पुंस्त्वान् यथादित्यः
प्राच्याद्याद्दशदिशः स्वप्रभया प्रकाशयन्भ्राजते एवं स प्रकृतो देवः अखंडचिदेकरसः सर्वं प्रकाशयन्भ्राजते भगवान्
समग्रैश्वर्यवीर्ययशः श्रीज्ञानवैराग्यसंपन्नः वरेण्यो वरणीयः अभ्युदयमोक्षकांक्षिभिः संभजनीयः योनिः सर्वस्य जगतो
मूळकारणं वस्वभावान्विपरीतमुखानणुपर्यंतान् हिरण्यगर्भप्रकृतीन्स्तंबपर्यंतांश्च सर्वान्पदार्थस्वभावानधितिष्ठत्यंत
र्यामिरूपेण नियमयति वा एकः अत एवाद्वितीयः योनिः स्वभावात्कारणस्वभावाच्कारणस्तान्मूळप्रकृतस्यवांतरप्रकृति
स्वरूपान्स्वरूपस्फुरणप्रदत्वेनाधितिष्ठति वा । परमेश्वरस्य मूले प्रकृतस्यवांतरप्रकृतीः प्रवृत्तिनिकार्योन्मुखत्वेन पाचकं
तत्तत्कार्यरूपेण परिणामयितृत्वं सर्वनिर्वर्तृत्वं जीवैः संचितपुण्यपापानुगुणं तथा सत्वरजस्तमसां अधितिष्ठातृत्वं चाह। २४

यच्च स्वभावं पचति विश्वयोनिः पाच्यांश्च सर्वान्परिणामयेद्यः । सर्वमेतद्विश्वमधितिष्ठत्येको गुणांश्च सर्वान्विनियोजयेद्यः ॥५॥
यश्च स्वभावं पचतीति यच्चेति लिंगव्यत्ययः यश्चेश्वरः सर्वं प्रकाशयन्नंतर्बहिर्व्याप्यावस्थितः स्वभावं स्वतानां स्वभावं स्वरूपं स्वसत्तास
न्निधिमात्रेण पचति । तत्तत्कार्यानुगुणं पक्वं करोतीति विश्वयोनिः विश्वस्य जगतो योनिरधिष्ठानत्वेनावस्थानं कारणमथवा विश्वं
योनिर्यस्य नियम्या स विश्वयोनिः पाच्यांश्च सर्वान्पाचकयोग्यान्सर्वान्समस्तकर्मकाळे तेजःपाकवन्नेन तत्तदवस्थारूपेण स्व

स्ति नैनमूर्द्धं न तिर्यंचं न मध्ये परिजग्रभत्। न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः॥१९॥ तस्येश्वरस्यानेन सुखानुष्ठ-
तित्वात्तादृशादितीयात्मा वा न प्रतिमास्ति उपमा नास्ति यस्य नाम महद्यशः यस्य परमेश्वरस्य नामाभिधानं महद्य-
शः दिग्गाद्यनवच्छिन्नं परिपूर्णं यश इति न तस्य प्रतिमास्तीत्यन्वयः। परमेश्वरस्येंद्रियैर्ग्राह्यत्वायोग्यतां प्रत्यक्षेणाव-
ख्यानं तदेकत्वज्ञानान्मोक्षसिद्धिं चाह। अस्य परमेश्वरस्य रूपं स्वरूपं रूपादिहीनं निर्विशेषं स्वयंप्रकाशं चिदेकरस-
त्वात् संदृशे चक्षुरादींद्रियैः संदर्शनविषयत्वे देशे न तिष्ठति न वर्त्तते। चक्षुरादिभिः संदर्शनेनायं न तिष्ठतीति वा इंद्रियैर्ग्रहीतुम-
योग्यस्वरूपत्वादेनमीश्वरं चक्षुषा चक्षुषेत्युपलक्षणमेतत् चक्षुरादींद्रियैः कश्चन कोपि न पश्यति च गृहीतुं न शक्नुयात्
यश्चक्षुषा न पश्यति येन चक्षूंषि पश्यतीत्यादिश्रुत्यंतरात् हृदा अयमात्मेदं नेति नेतीति शोधनरूपोपदेशेन हृदिस्थं
हृदये हृत्कारगुहायां प्रत्यक्षं नावच्छिन्नं मनसा संस्कृताहंकारशून्यबुद्ध्या य एनं एवं विदुर्ये साधनचतुष्टयसंपन्ना योग्या-
धिकारिणः एनमात्मानं। न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनं। हृदा मनीषा मनसाभिक्लृप्तो य एन-
मेवं विदुरमृतास्ते भवंति॥२०॥ एवं विदित्वा विदुरहमीशोस्मीत्यपरोक्षीकुर्युस्ते अहं ब्रह्मास्मीत्यपरोक्षीकृते कृतार्था अमृतास्ते भवंति मरणधर्मा-
णामयति मरणहेतुभूतदेहसंबंधं पुनर्न प्रतिपद्यंते इति यावत्। ईश्वराधीनत्वान्मोक्षसिद्धेस्तत्सिद्धये ईश्वरप्रार्थनमाह।
अजात इत्येवं कश्चिद्भीरुः प्रपद्ये। रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यं॥२१॥ अजात इति इतिशब्दो हेत्वर्थः यस्मात्त्वमेव एवमुक्तप्रकारे-
णाजातो जन्ममरणशून्यो नायापि का सा शोकोऽतो ह्यनुविक्रांत संसाराद्भीरुः भीतः सन् कश्चिदतिविशुद्धांतःकरणो योग्याधिकारी अहं प्रपद्ये त्वमे-
कतां प्रपद्ये प्राप्नुयां रुद्रः रुजं संसारदुःखं द्रावयति नाशयतीति रुद्रः संहारकाले सर्वं रोदयतीति वा रुद्रः हे रुद्र यत्ते दक्षिणं मुखं तेन तव दक्षि-
णं दक्षं मुमुक्षुरक्षणे चतुरं वा दक्षिणं सबीजसंसारदुःखदाहसमर्थं रूपं निर्गुणं तव सकलं निष्कलं मुखयोर्मोक्षप्रदानसमर्थं निष्कलं मुखं
सकलेन मोक्षप्रदानसमर्थं निष्कलमुखेन नमामि विशुद्धांतःकरणं साधनचतुष्टयसंपन्नयोग्याधिकारिणं मां पाहि सद्रूपेणाहं ब्रह्मास्मी-
ति बुद्धिफलकारूढो भूत्वा संसारदुःखनदीजदाहकत्वेन पाहि रक्ष स्वनित्यं सर्वदा आत्मतया निरतिशयानंदस्वरूपावस्थितिः संसा

स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः ।८। गुणान्वयः सत्त्वरजस्तमआख्यैर्गुणैरन्वयो यस्य स
गुणान्वयः फलकर्मकर्ता ईश्वरजोऽन्वितः सत्त्वगुणपरवशः सन्मोक्षार्थं करोति ईश्वसत्वान्वितरजोगुणपरवशः सन्
स्वर्गादिफलसाधनं कर्म करोति ईश्वरजोऽन्वितस्तमोगुणपरवशः सन् नरकादिसाधनं कर्म करोति । एवं गुणपरवशः
सन् फलार्थस्य कर्मणः कर्ता कृतस्य स्वकृतस्य तस्यैव कर्मणः फलस्य यः फलार्थं कर्म कृतं प्रकारेण करोति स एवोपभो
क्ता च यो गुणपरवशो भूत्वा फलार्थानि कर्माण्युपचिनोति स्वकृतैः कर्मभिः सुरनरतिर्यगादिनानारूपतया वर्त
मानत्वाद्विश्वरूपः त्रिगुणः कामक्रोधलोभाख्यास्त्रयो गुणा यस्य । त्रिवर्त्मा देवयानपितृयाणतिर्यग्मार्गाख्यास्त्रयो
मार्गा विद्यन्ते अस्येति त्रिवर्त्मा । प्राणाधिपः प्राणादिपंचवृत्तेर्मुख्यप्राणस्य करणात्मकस्येतरप्राणस्य चाधिपः । स्वामी कार्य
करणस्वामी नियामकः संचरति स्वकर्मभिरेकादशेन्द्रियस्थूलसूक्ष्मपंचकप्राणस्य सप्तदशात्मकं लिंगशरीरमात्म
सात्कृत्य तदुपाधिकः सन्सत्यादिकामादिगुणपरवशो भूत्वा शुभाशुभानि कर्माणि कृत्वा तैः स्वकर्मभिः परवशो भूत्वा लोद
धिमध्यवर्त्ति[illegible]लालावुवत् संसारदुःखमहोदधौ संचरति संचरते परिभ्रमति छांदसं परस्मैपदं । अद्वितीयेश्वर
रयजीवो नान्य इति जीवस्य जीवत्वं भेदपरिच्छेदकर्तृत्वादे[illegible]पाधिकत्वेनाभासकं चिद्ज्ञाताज्ञाततया सर्वं सर्वसाक्षि
तात्स्वयं प्रकाशाखण्डबोधैकरसत्वं चाह । अंगुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः । बुद्धेर्गुणे
नात्मगुणेन चैव आराग्रमात्रो ह्यवरोऽपि दृष्टः ।८। अंगुष्ठमात्रः अंगुष्ठपरिमिते हृदयपुंडरीककुहरे वर्त्तमा
नत्वादंगुष्ठमात्रः । ननु स्वतोंगुष्ठमात्रपरिमाणस्थितः रवितुल्यरूपः इदं जानामीति तयातदतिरिक्तं सर्वं न जानामीत्यज्ञातत
पाचज्ञातत्वज्ञानज्ञेयादिसर्वस्य साक्षित्वादनवच्छिन्नचित्प्रकाशरूपः संपन्नाहंकारसमन्वितो रवितुल्यरूपश्च यः स बुद्धेर्लिंग
शरीरस्य गुणेन परिच्छेदस्वेदादिनात्मगुणेन स्वस्वरूपभूततत्त्वधिकगुणेनैव दृष्टः नान्येनैव दृष्टः प्रकाशितः दीप्तः अवरः महाका
शस्थानीयपरमेश्वरापेक्षया अवरोऽपि भवति । अविद्याद्युपाधिकत्वाज्जीवस्य तस्योक्तपरिच्छेदस्योपाधिकत्वेनाभासकत्वं

स्वतो द्वितीयत्वं चाह॥ ।वालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानंत्याय कल्पते॥९॥ वाला
ग्रस्य यः शततमो भागस्तस्य पुनरपि शतधा विभक्तस्य यो भागः स यथा सूक्ष्मस्तद्वज्जीवोऽतिसूक्ष्मः उपाध्यवच्छिन्नरूपेण सूक्ष्मो
विज्ञेयः स चानंत्यापकल्प्यते चकारोवधारणे स जीव आनंत्यायैव कल्प्यते स्वरूपेणाद्वितीयो भवति। स्वत ईश्वरस्ततस्य
जीवस्य लिंगशरीरोपाधिकर्तृत्वतद्धर्मभेदादिभ्रान्त्यैवास्ते तानीस्वतः स्थूलदेहतद्धर्मशून्यत्वं स्वाविद्यया स्थूलदेहोपाधि
कर्तृत्वतद्धर्मशास्तृत्वं चाह। ।नैव स्त्री न पुमानेष न चैवायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स युज्यते॥१०॥ ज्ञानात्मके दि
ताशेषविशेषानंतसुखसंविन्मात्ररसेश्वरस्वरूपत्वात्स्वतत्वज्जीवो नैव स्त्र्यादिधर्मयुक्तः। किंत्वविद्याकामकर्मादिवशाद्यद्य
च्छरीरं मिथ्याभिमानात्स्वीकुरुते तेन तेन (संयुज्यत इति) स्त्र्यादिरूपेणात्मसंविद्यानात्मा पुज्यते संबध्यते अहं स्त्री अहं पुमान्
अहं नपुंसकं अहं जातो हं कृशो हं मृत इत्यादिमिथ्याभिमानपाशाबद्धो तया संबध्यते च शब्देन स्वतो निरस्ताशेषवि
शेषत्वं स्वाविद्यया सविशेषत्वं प्रदर्श्यते। आत्मनः कार्यकरणोपाधिपरिग्रहः कर्तृत्वादिसंसारधर्मस्पृष्टत्वं च किंनि
मित्तमित्याकांक्षायामाह॥ ।संकल्पनस्पर्शनदृष्टिहोमैर्ग्रासांबुवृष्ट्या स्वविवृद्धिजन्म। कर्मानुगान्यनुक्रमेण देही स्थाने
षु रूपाण्यभिसंप्रपद्यते॥११॥ संकल्पनं मनसो व्यापारस्तीर्थेष्वन्यत्र वस्तुतः हिंसां न कुर्यामित्येवमादिरूपः पुण्यहेतु
र्भवति स एव तीर्थेष्वन्यत्र हिंसां कुर्यामित्यादिरूपश्च पापहेतुर्भवति। संकल्पेन स्पर्शनं च त्वगिंद्रियव्यापारः गंगोदकादि
स्पर्शनं पुण्यहेतुर्भवति। चांडालादिस्पर्शनं पापहेतुस्तेन स्पर्शनेन दृष्टिश्चक्षुर्व्यापारः सेतोदर्शनं पुण्यहेतुर्भवति। पति
तादिदर्शनं पापहेतुस्तेन दर्शनेन होमो हस्तव्यापारः अग्निहोत्रादिहोमः पुण्यहेतुर्भवति। आभिचारादिहोमः पापहेतुः
तेन होमेन इतरेंद्रियव्यापाराणामप्युपलक्षणं एतैः संकल्पनस्पर्शनदृष्टिहोमैर्ग्रासांबुवृष्ट्या ग्रासवृष्ट्यांबुवृष्ट्या
ग्रासोन्नं वृष्टिरतिदानं उत्कृष्टदेशकालपात्रेषन्नांबुनो रत्यादरेण दानमतिदानं पुण्यहेतुर्भवति विपरीते भवति

दानं पापहेतुः। अथवा योग्यायोग्येषु ग्रासप्रदानं पुण्यपापहेतुर्भवति अंबुदानं च तथा॥ छिदिर् छेदने अनर्थव
तामर्थोच्छेदनं पुण्यहेतुर्भवति अर्थवतामर्थोच्छेदनं पापहेतुर्भवति ग्रासेनांबुना इष्ट्या च ग्रासांबु इष्ट्या तया ग्रासांबु
इष्ट्या च आत्मविरहितः छिन्न आत्मन एतेषां कर्तृविरहितः स्थजन्महिरण्यगर्भस्तंबपर्यंतेषु योनिषु चतुर्भ्यस्य विदध्या
दि इतरस्त्वात्र विकार अश्नुवति विहितविरिंसु पलक्षणं इममेवार्थं स्पष्टतया व्यावर्त्तयति कर्मानुगानीति कर्मानुसारीणि
पुण्यकर्मानुसारीणि हिरण्यगर्भादिदेवशरीराख्यानि रूपाणि। पापानुसारीणि तिर्यग्रूपाणि समप्रधानतया वर्त्तमा
नपुण्यपापानुसारीणि मनुष्यशरीराणि अनुक्रमेणानुकर्मपाकमनुसृत्य क्रमेण देही लिंगशरीरोपाधिक आत्मास्था
नेष्वध्यात्मादिस्थे दर्शितलक्षणेषु ब्रह्मादिपिपीलिकांतेषु रूपाण्युक्तलक्षणानि रूपाणि अभिसंप्रपद्यते अभि अभितः स
मष्टिव्यष्टिरूपसमस्तकरणान्यहं ममाभिमानि संप्रपद्यते संप्राप्नोति। एवं मंत्रे व्याख्याय अनेकरूपाणां स्वरूपप्रकारं संसा
रसंजनप्रकारं चाह॥ ।स्थूलानि सूक्ष्माणि बहूनि चैव रूपाणि देही स्वगुणैर्वृणोति। क्रियागुणैरात्मगुणैश्च तेषां संयो
गहेतुरपरोपि दृष्टः॥१८॥ स्थूलानि पार्थिवानि शरीराणि भूर्लोकवर्त्तीनि ततः सूक्ष्माण्यम्मयानि भुवर्लोकवर्त्तीनि शरी
राणि ततोपि सूक्ष्माणि तैजसानि स्वर्लोकवर्त्तीनि शरीराणि वायवीयानि महर्लोकवर्त्तीनि शरीराणि ततोपि विविधन्मया २६
नि तपःसत्यलोकवर्त्तीनि सर्वशरीरारंभे सर्वत्र तान्यारंभकतया वर्त्तंत एव अनंतास्तत्तल्लोकवर्त्तिनस्तच्छरीरारंभेत
त्र स्थूलप्राधान्यमेवोक्तमिति द्रष्टव्यं। अथवा स्थूलानि हस्त्यादिशरीराणि सूक्ष्माणि मशकादिशरीराणि बहूनि अने
कान्यनेकरूपाणि शरीराणि देही विज्ञानात्मा स्वगुणैः स्वस्मिन्नध्यस्तैः स्वक्रिया अविद्यातस्याः गुणैः सत्वरजस्तामो
भिरथवात्मगुणैः सत्तोपाध्यवच्छिन्नतया वर्त्तमानः सत्तास्फुरणादिभिः संभजते। क्रियागुणैः श्रौतस्मार्त्तविहि
तप्रतिषिद्धक्रियाजन्यधर्माधर्मलक्षणापूर्वैश्च आत्मगुणैरात्मलिंगशरीरं तस्य गुणैर्विहितप्रतिषिद्धोपासनादि
भिश्च उक्तो नीतिः सर्वत्रानुचयः। तं विद्याकर्मणी समन्वारभेते इति श्रुत्यंतरात्। तेषां कार्यकरणस्वामिनः करणानां तद्धर्मा

सत्तासंनिधिमात्रेण परिणामयेद्य ईश्वरः सर्वज्ञो नहि श्वं सर्वं विश्वमेतद्धत्वं विश्वं निःशेषं सन्धिनिष्ठत्वं तर्यामि रूपेणि
पतिवत्कः अन्तरवाह्यितीयः गुणाश्च सर्वान्सत्वादिकान्गुणान्पुण्यपापानुगुणं तया अध्यात्मादिभेदभिन्नस्तत्तत्प्रवृत्तिनियो
येनयपईश्वरः सत्य सकारणसंसारविनिर्वर्तनये स्वात्मत्वेनैव विदितव्यो नान्य इति वाक्यशेषः अथवायछन्दस्योत्तरमंत्र
तेन तच्छब्देन संबन्धो द्रष्टव्यः परमेश्वरस्य वेदान्तेषु गूढत्वं चक्ता तानाकारणत्वं हिरण्यगर्भ वामदेव प्रमुखे देवैर्ऋषिभि
श्चात्मतया अपरोक्षीकृतत्वं। आत्मतया परोक्षीकृतत्वं आत्मतया परोक्षीकृते श्वरतत्वाना स्वतएतया निरतिशयानन्दावि
र्भावलक्षणं मोक्षं चाह। तद्वेदगुह्योपनिषत्सु गूढं तद्ब्रह्मा वेदते ब्रह्मयोनिं। ये पूर्वं देवा ऋषयश्च तद्विदुस्ते तन्मया अ
मृता वै बभूवुः॥८०॥ तत्प्रकृतमीश्वरतत्वं वेदगुह्योपनिषत्सु वेदे कर्मभागे पक्ष्यत्वेनावावस्थितं गुह्यं आरण्यके सगुण
भागे उपास्यत्वेनावस्थितमुपनिषदि निर्गुणभागे शेयत्वेनावस्थितं मूढं गुह्यरूपेणावस्थितं अथवा वेदश्यासौ गुह्यश्चेति
वेदगुह्यस्तस्मादपि रहस्यभूतोपनिषत्सु वेदान्तेषु गूढं तच्छक्तिता स्वपार्ष्णप्रमेयत्वेन संदेहं तत्यानंब्रह्मा वेदते न रूढ ईश्व
रतत्वं तद्ब्रह्मा हिरण्यगर्भो वेदते जानाति आत्मतया साक्षात्करोति ब्रह्मयोनिं वेदकारणं हिरण्यगर्भकारणं वाये पूर्वपरा
मदमादिसाधनसंपन्नाः पूर्वकाले देवा अग्न्यादित्यादयो ऋषयश्च तत्पदार्थभूतं परमात्मतत्वं स्वात्मत्वेन विदुरपरोक्षी
कृतवन्तस्ते अपरोक्षीकृतपरमात्मतत्वास्तन्मया अनुदितानस्तमितानंदस्वभावेश्वरमयाईश्वरस्वरूपास्सन्तः सम्यग्ज्ञा
नेनेश्वरस्यावध्यवधापकाविद्या तत्कार्यदेहाद्यानन्मया अमृता अमरणधर्माणो जननमरणादिसंसाररहिताश्च बभूवुः
ब्रह्मैव सन्ब्रह्माप्येति ब्रह्मवेद ब्रह्मैव भवतीत्यादिश्रुत्यंतरात् वै इतिप्रसिद्धिं न्याय प्रसिद्धिमनुभवप्रसिद्धिं च
दर्शयति। तत्पदार्थस्ततस्य सत्यसुखसंविन्मात्ररसत्वमद्वितीयत्वमखंडत्वं वेदांतवेद्यत्वं अविकारित्वं प्रत्यक्त्वं चो
पदिष्टपरानीत्वं पदार्थस्तस्य जीवस्य कार्यकारणादिभ्यो वैलक्षण्यं सत्यसुखानुवृत्तित्वमसंगत्वं निसत्वं परमात्म
रूपत्वं च प्रतिपादयितुमुत्तरे केचिन्मंत्राः प्रवर्तन्ते तत्र प्रथमं जीवस्य कर्तृत्वभोक्तृत्वादिसंसारः स्वाभाविको
न भवति किंतु देहेन्द्रियाद्युपाध्यविवेककृत इत्याह॥ गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता॥

तस्य

जातत्वस्य कार्यकरणसंघातसाक्षित्वाद्दवस्थात्रयेऽप्यनपायिस्वरूपत्वादवस्थात्रयसाक्षित्वाच्च तेभ्यो व्यति
रिक्तस्य त्वं पदार्थस्य तस्याप्यतत्वस्य तत्पदार्थभूतपरमेश्वरतत्त्वेन समभेत्य योगः एक्यलक्षणं योगं समेत्य स
म्यक् ज्ञात्वा अपरोक्षीकृत्येति यावत्। कैः पुनः साधनैरीश्वरैकत्वज्ञानं समुत्पद्यत इत्यपेक्षायामाह। एकेनेति
गुरूपसदनेन द्वाभ्यां गुरुभक्तीश्वरभक्तिभ्यां त्रिभिः श्रवणमनननिदिध्यासनैः अष्टभिः यमनियमासनप्राणा
याम प्रत्याहार ध्यान धारणा समाधिभिर्वा राग्यार्थे कालेनेति जन्मनि जन्मान्तरे वा ज्ञानार्थमनुष्ठितसाधनकला
पाकालेनाधिकारसंपत्तिर्यदा तत्तत्कालेनेति वा आत्मगुणैश्च दयाक्षान्तिशौचसमतास्पृहाकार्पण्यानायासअन
सूयाख्यैरात्मगुणैः सूक्ष्मैरनेकजन्मज्ञानार्थमनुष्ठितपुण्यसंस्कारैश्च त्वादिशब्दितैरेतैः साधनकलापैरात्मतत्त्व
स्येश्वरतत्त्वेनैक्यलक्षणं योगमपरोक्षीकृत्य मुक्तो भवतीति वाक्यशेषः। एवं मन्त्रो क्रमेणार्थं स्पष्टीकरोति॥

आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान्विनियोजयेद्यः। तेषामभावे कृतकर्मनाशः कर्मक्षये याति
स तत्त्वतोऽन्यः।४। आरभ्य कर्माणि नित्यनैमित्तिकानि गुणान्वितानि ईश्वरसमाराधनगुणान्वितानि आरभ्य क
त्वा ते गुणान्वितत्वेन स्वफलैः कर्मभिः परिपक्वकषायः सन् सर्वपदार्थान् विनियोजयेदिति यतेः समाधिप्रकार
कथनमिदं। यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विका २८
रो नामधेयं त्रीणि रूपाणीत्येव सत्यमिति श्रुत्यन्तरोक्तप्रकारेण स्थूलव्यष्टिजातं स्थूलसमष्टिषु विनियोज्य तावन्मा
त्रतया वितर्कः स्थूलसमष्टीरपि पञ्चीकृतपञ्चमहाभूतेषु विनियोज्य तावन्मात्रतया विविंतयित्वा तेषामपुनरोत्त
रतन्मात्रां स्वं स्वं भूतं स्वस्वभूतमात्रतया प्रविलाप्य तदपि तदपितन्मात्रतया प्रविलाप्य तन्मात्रमप्युत्तरो
त्तरतन्मात्रात्सर्वं सर्वतन्मात्रतया प्रविलाप्य तामपि स्वप्रकृतिमात्रतया प्रविलाप्य तामपि मायासन्मात्रत
या प्रविलाप्य तदपि चिन्मात्रतया शुद्धा तामपि चितिमानन्दमात्रतया शुद्धातमप्यानन्दमद्वितीयमात्रतया शुद्धा

णो वतेषां संयोगहेतुः संयोगस्य हेतुर्भोक्तृभोगोपकरणभोगायतनादिलाभेनान्वयस्य हेतुर्निमित्तं अपर उक्तेस्य अपरोन्यो
पि पर्वप्रज्ञा चेतिश्रुतेर्दृष्टः सर्वप्रज्ञा चेति च त्राध्वस्थाने त्रापित्राद् इति दृष्टव्यत्वं पदार्थस्तत्त्वजीवस्य संसरणप्रकारमुक्त्वेदानींत
स्य नेति नेतीति प्रतिषिद्धाशेषानंतसुखचिन्मात्ररूपतत्पदार्थेनैक्यज्ञानान्मोक्षसिद्धिमाह। अनाद्यनंतं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपं। विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः ।१३। अनाद्यंतमाद्यंतशून्यं कलिलस्य गह
नसंसारचक्रस्य मध्ये साक्षित्वेनावस्थितं विश्वस्य विश्वप्रपंचस्य स्रष्टारं स्वाविद्ययोत्पादयितारं तछ्येर्थस्त्वं अनेकरूपं त्रि
कोणत्वाद्यनेकावस्थापन्नायःपिंडानुगतं वह्निवर अलादिरूढावशात्कार्यकरणोपाधिषु जले चंद्रवदनुप्रविश्य तच्चारूपेणावस्था
समानं विश्वस्य प्रकृतिप्राकृतरूपस्य विश्वस्य परिवेष्टितारं परितोंतर्बहिश्च स्वोपदर्शितव्याघ्रादेर्मायाविवस्यास्मिन्परिकल्पितं र
जतादेः शुक्त्यादिवद्वेष्टितारं व्याप्तारं अत एवैकेन अद्वितीयदेवं द्योतनस्वसत्तायं चिन्मात्रैकरसं ज्ञात्वा स्वात्मत्वेनापरोक्षीकृत्य
मुच्यते सर्वपाशैः प्रकृतिप्राकृताख्यैः सर्वैः पाशैर्मुच्यते अनंतसत्यसुखचिन्मात्रतया स्वात्मपरोक्ष्यादविद्यायाः कार्यरूपाः सर्वे पा
शाबोधितास्तवेयुरित्यर्थः। परमेश्वरस्य परिशुद्धांतःकरणग्राह्यत्वं निराधारत्वं जगदुत्पत्तिलयहेतुत्वं कलाहेतुत्वं तद्देव
ज्ञानान्मोक्षहेतुत्वं चाह॥ भावग्राह्यमनीडाख्यं भावाभावकरं शिवं। कलासर्गकरं देवं ये विदुस्ते जहुस्तनुं॥१४॥
भावग्राह्यं परिशुद्धांतःकरणग्राह्यमनीडाख्यमनीडं शरीरं तद्रहितत्वेनोपनिषत्स्वाख्यायमानं अथवा नीडं स्थानं आख्या
भिधानं नीडाख्यं अस्य न विद्यत इत्यनीडाख्यं भावाभावकरं भावाभावयोः सृष्टिसंहारयोः कर्तारं शिवमविद्यादि
दोषमलैरनास्कंदितं सुखरूपं कलासर्गकरं कलया स्वमायाशक्त्या समस्तस्य तत्सर्गकरं अथवा कलानां षोडशकला
नां प्राणादिनामांतराणामथर्वणोक्तानां सृष्टिकर्तॄणां वेदानां इतरविद्यानां च सृष्टिकमिति यादेयमनुभूत्येकरसं ये नि
त्यानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरा(रक)गशमादिसाधनसंपन्नमुमुक्षुत्वाख्यसाधनचतुष्टयसंपन्ना विदुरय
हमस्मीत्यपरोक्षीकुर्युस्ते वा परोक्षीकृतेश्वरस्ता वा स्ततनुं प्रकृतिप्राकृतरूपां जहुस्त्यजंति ईश्वरस्वेददर्शनेन प्रकृ
तिप्राकृतिरूपा तनुर्बाधितास्तवेदिति पावरः। इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीज्ञानोत्तमाचार्यशिष्यस्य विज्ञाना

तातत्त्वस्य कार्यकरणसंघातसाक्षित्वादवस्थात्रयेप्यनपायिस्वरूपत्वादवस्थात्रयसाक्षित्वाच्च तेभ्यो व्यति-
रिक्तस्य त्वंपदार्थस्य तस्यात्मतत्त्वस्य तत्पदार्थभूतपरमेश्वरतत्त्वेन सम्भेदस्य योगः ऐक्यलक्षणो योगः सम्भेदस्य स-
म्यक् प्रत्यापरोक्षीकरणे इतियावत्। कैः पुनः साधनैरीश्वरैकत्वज्ञानं समुत्पद्यत इत्यपेक्षायामाह। एकेनेति
गुरूपसदनेन द्वाभ्यां गुरुभक्तीश्वरभक्तिभ्यां त्रिभिः श्रवणमनननिदिध्यासनैरष्टभिर्यमनियमासनप्राणा-
याम प्रत्याहार ध्यान धारणा समाधिभिर्वा [illegible] कालेनेह जन्मनि जन्मान्तरे वा ज्ञानार्थमनुष्ठितसाधनकला-
पाककाले नाधिकारसंपत्तिर्यदा तत्तत्कालेनेति। वा आत्मगुणैश्च दयाक्षान्तिशौचमंगलास्पृहाकार्पण्यानायासअन-
सूयाख्यैरात्मगुणैः सूक्ष्मैरनेकजन्मज्ञानार्थमनुष्ठितपुण्यसंस्कारैश्च त्वादि शब्दितैरेतैः साधनकलापैरात्मतत्त्व-
स्येश्वरतत्त्वेनैक्यलक्षणं योगमपरोक्षीकृत्य मुक्तो भवतीति वाक्ययोगः। एवं मन्त्रो क्रमेणार्थं स्पष्टीकरोति॥
आरभ्य कर्माणि गुणान्वितानि भावांश्च सर्वान्विनियोजयेद्यः। तेषामभावे कृतकर्मनाशः कर्मक्षये याति
स तत्त्वतोऽन्यः॥ ४॥ आरभ्य कर्माणि नित्यनैमित्तिकानि गुणान्वितानि ईश्वरसमाराधनगुणान्वितानि आरभ्य कृ-
त्वा तैर्गुणान्वितत्वेन स्वकृतैः कर्मभिः परिपक्वकषायः सन् सर्वपदार्थान् विनियोजयेदिति यतः समाधिप्रकार
कथनमिदं। यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येत्यपागादग्नेरग्नित्वं वाचारम्भणं विका- २८
रो नामधेयं त्रीणि रूपाणीत्येव सत्यमिति श्रुत्युक्तप्रकारेण स्थूलव्यष्टिजातं स्थूलसमष्टिषु विनियोज्य तावन्मा-
त्रतया वितर्क्य स्थूलसमष्टीरपि पञ्चीकृतपञ्चमहाभूतेषु विनियोज्य तावन्मात्रतया विचिन्तयित्वा तेषामप्युत्तरोत्त-
रतन्मात्रां पूर्वपूर्वभूतं सर्वसर्वभूतमात्रतया प्रविलाप्य तदपि तदपितन्मात्रतया प्रविलाप्य तन्मात्रमप्युत्तरो-
त्तरतन्मात्रायां पूर्वपूर्वतन्मात्रतया प्रविलाप्य तामपि महत्प्रकृतिमात्रतया प्रविलाप्य तामपि मायासन्मात्रत-
या प्रविलाप्य तदपि चिन्मात्रतया शुद्ध्वा तामपि चिदिति मा भद मात्रतया बुद्ध्वा तमप्यानन्दमद्वितीयमात्रतया शुद्धा

णां वतेषां संकोगहेतुः संयोगस्य हेतुर्लोके भोगोपकरण भोगायतनादित्वावेनाच्चयस्य हेतुर्निमित्तं अपर उक्तेस्य अपरोन्यो
पिपर्व प्रज्ञाचेतिश्चेनोदृष्टः सर्वप्रज्ञाचेतिच त्रयस्त्वाने त्रापित्राश्चद्दतिदृष्टव्यत्वं पदार्थस्तज्जीवस्य संसरणप्रकारमुक्त्वा नीत
स्यनेतिनेतीति प्रतिषिद्धाशेषानंतसुखचिन्मात्ररूपतत्पदार्थैक्यज्ञानान्मोक्षसिद्धिमाह। अनाद्यनंतं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपं। विश्वस्यैकं परिवेष्टितारं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥१३॥ अनाद्यंतमाद्यंतशून्यं कलिलस्य गह
नसंसारस्य अस्य मध्ये साक्षित्वेनावस्थितं विश्वस्य विश्वप्रपंचस्य स्रष्टारं स्वाविद्ययोत्पादयितारं तद्ध्यर्थस्तत्रं अनेकरूपं वि
कोणत्वोत्पन्ने कावस्थापन्नायः पिंडानुगतं वह्निवत्प्रभृत्यादिरूपं वर्तत कार्यकरणोपाधिषु उक्तेचंद्रवदनुप्रविश्य तत्तद्रूपेणावभा
समानं विश्वस्य प्रकृतिप्राकृतरूपस्य विश्वस्य परिवेष्टितारं परिक्तं बहिरेकस्योपदर्शितत्वाद्घटादेर्भौपाधिकस्य स्मिन्परिकल्पितत्र
उताहेः श्रुत्यादिववेष्टितारं व्याप्तारं अनात्मवेकेनमद्वितीयं देवं द्योतनस्वभावं चिन्मात्रैकरसं ज्ञात्वा स्वात्मत्वेनापरोक्षीकृत्य
मुच्यते सर्वपाशैः प्रकृतिप्राकृतरूपैः सर्वैः पाशैर्मुच्यते अनंतसत्यसुखचिन्मात्रतया स्वात्मापरोक्ष्यादविद्यायाः कार्यरूपाः सर्वे पा
शा बोधितास्त्वेपुरित्यर्थः॥ परमेश्वरस्य परिशुद्धांतःकरणग्राह्यत्वं निराधारत्वं जगदुत्पत्तिलयहेतुत्वं कल्याणहेतुत्वं तद्वेद
ज्ञानान्मोक्षहेतुत्वं चाह॥ भावग्राह्यमनीडाख्यं भावाभावकरं शिवं। कलासर्गकरं देवं ये विदुस्ते जहुस्तनुं॥१४॥
भावग्राह्यं परिशुद्धांतःकरणग्राह्यमनीडाख्यं नीडं शरीरं तद्रहितत्वेनोपनिषत्स्वाख्यायमानं अथवानीडस्थानं आख्या
सिधाने नीडाख्यं अस्य न विद्यत इत्यनीडाख्यं भावाभावकरं जगतो भावाभावयोः सृष्टिसंहारयोः कर्तारं शिवं उडतादि
दोषमलैरनास्कंदितसुखरूपं कलासर्गकरं कलया स्वमायया चेष्टया समस्तभूतसर्गकरं अथवा कलानां षोडशकला
नां प्राणादिनामांतरत्वेनाथर्वणोक्तानां सृष्टिकलानां वेदानां इतरविद्यानां च सृष्टिकमिति वा देवमनुरूपे फरसंपन्नि
स्तानित्यवस्तुविवेकेहामुत्रार्थफलभोगविरा(रक)गशमादिसाधनसंपन्नमुमुक्षुत्वाख्यसाधनचतुष्टयसंपन्ना विदुर
हमस्मीत्यपरोक्षीकुर्युस्ते वा परोक्षीकृतेश्वरस्ता वास्तत्तनुं प्रकृतिप्राकृतरूपां जहुस्त्यजंति ईश्वरस्य दर्शनेन प्रकृ
तिप्राकृतिरूपा तनुर्बाधिता स्यादिति भावः। इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीज्ञानोत्तमाचार्यशिष्यस्य विज्ञाना

तिभवस्तुतः भवस्य स्मात्सर्वमिति भावः प्रकृतं अवितथस्य रूपस्तंभावभूतमीड्यं सर्वेषां स्तुत्यं देवं चित्प्रकाशरूपं स्वचि
त्तस्थं चित्तास्य व्यक्तिंगशरीरस्थं पूर्वं पूर्वमेव तस्मिन्नुपस्थकृतं पास्थितं उपास्य अहमस्मीत्यपरोक्षीकृत्यांतःकरणगुहा
यां सर्वेऽजीवरूपेणास्थितं परमेश्वरमहमस्मीत्यपरोक्षीकृत्य मुक्तो भवतीति वाक्यशेषः यातीति पूर्वेण संबंधः। अयं मंत्र
एवं निर्गुणवस्तुपरतया केश्चिद्व्याख्यातः केश्चित्तु सगुणवस्तुपरतया व्याख्यातः अस्मिन्पक्षे स्वचित्तस्थं स्वचित्ते
शास्त्रेणानिर्वेदितमुपास्य विजातीयप्रत्ययानंतरितसजातीयप्रत्ययप्रवाहरूपं तद्विषयकोपासनं कृत्वा पूर्वं सम्यग्ज्ञा
नोदयात्पूर्वं सम्यग्ज्ञानाधिकारसिद्ध्यर्थं पश्चात्तेन लब्धसम्यग्ज्ञानाधिकारो भवतीत्येवं योजयितव्यं। परमेश्वरस्य सं
सारदोषास्पृष्टत्वं सर्वद्वैतकल्पनाधिष्ठानत्वं तद्धर्म्माप्रापित्वं निरंकुशैश्वर्यं चैतज्ज्ञानमोक्षसिद्धिर्वाह ॥ ॥
स वृक्षकालाकृतिभिः परोन्यो यस्मात्प्रपंचः परिवर्त्ततेयं। धर्म्मावहं पापनुदं भगेशं ज्ञात्वात्मस्थममृतं विश्वधाम ॥६॥
स प्रकृतः परमेश्वरः वृक्षकालाकृतिभिः पंचम्यर्थे तृतीया वृक्षः संसारवृक्षः तस्माद्धेतुवादिसमस्तकालविशे
षानुस्यूतकालत्वं तत्र कालशब्देनोच्यते तस्मादाकृतिरांसमंतादाकृतिः क्रियत इति कृतिर्महदादिसमस्तकार्यरूपेण मा
यारव्या प्रकृतिः क्रियते निर्वर्त्यते स्याधिष्ठात्रा परमेश्वरेणेत्याकृतिरिति मूलप्रकृतिरुच्यते सर्वव्यापकत्वादासे
वसतिरुच्यते तस्याश्च प्रयोगोनंतरस्ते स्यो विलक्षणस्वरूपत्वाद्वा अन्योन्यः परः स्वपदमुत्तमृष्टश्चेति पदद्वयत्ययनेनैवं बोधोर्थः य
स्मादनंतसुखचिन्मात्रवपुषईश्वरादयं प्रपंचः परिवर्त्तते। स्वप्रदृष्टारब्धवृषभस्य तदुपदर्शितया भ्रादिप्रपंचः परिव २९३
र्ततेयथा तद्वस्य तदेनित्यं संबंधात् धर्म्मावहं यज्ञदानतपोभिः समाराधनरूपेणाधर्म्मप्रदं तेनैव रूपेण पापक्षय
तारंभगेशं ऐश्वर्यस्येति श्लोकोक्तानामीश्वरं अधिपतिं आत्मस्थमात्मनि करणसंघाते तत्रापि बुद्धौ तत्प्रत्यग्रूपेणास्थि
तमात्मतयैवास्थितमात्मस्थमिति वा अमृतममरणधर्म्माणं विश्वधाम सर्पादीनां रज्ज्वादिवद्विश्वस्याधारं तं ज्ञात्वा
अहमस्मीत्यपरोक्षीकृत्य दग्धसंसारबीजो भवतीति वाक्यशेषः। परमेश्वरस्यैव कर्त्तृत्वं तद्देकसद्दर्शिनां कृतेकृत्यता

नुमयनेत्याह॥ ॥तमीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतं। पतिं पतीनां परमं परस्ताद्विदाम देवं भुव-
नेशमीड्यं॥ तं प्रकृतं परमात्मानं ईश्वराणां जगदुत्पत्तिस्थितिप्रलयहेतुभूतानां ब्रह्मविष्णुरुद्राणां परममुत्कृष्टं
तेषां महेश्वरं च ईश्वराणामपीशितृत्वस्य तदधीनत्वान्महेश्वरः सामान्येश्वरश्चेति महेश्वरं तं महान्तं गरीयांसं ईश्वरं निय-
तारं देवतानामिन्द्रादीनां दैवतहेतुभूतत्वात्परममुत्कृष्टं दैवतं तेषां दैवतं च ऐश्वरं मोक्षसिद्ध्यर्थं सज्जनीयं पतिं स्वा-
मिनं पतीनां समष्टिकार्यकरणोपाधित्वाद्व्यष्टिकार्यकरणोपाधेरस्य सर्वस्य पतीनां हिरण्यगर्भादीनां परमं नियतं प-
रममुत्कृष्टं वा पाशादिदोषविशेषानन्तानन्दस्वभावत्वात्परस्तात्स्वकृतेभ्यः परस्ताद्रूपं देवमनुदितानस्तमितानन्तचि-
त्प्रकाशरूपं भुवनेशं भुवनानामीशं नियन्तारं निखिलकार्यजातस्येशानमिति यावदीड्यं वेदेतिहासपुराणैः स्तुत्यं विदा-
म विद्मः लडर्थे लोट् एवंभूतं परमेश्वरमात्मतयाऽपरोक्षीकृत्य वर्तामहे अतः सर्वपुरुषार्थसमाप्तिरूपमाह पुरुषा-
र्थस्य स्वरूपतया आविर्भूतत्वाद्ध्येयं भूतं स्वरूपतया वर्तामह इति विद्वदनुभवो दर्शितः। बिंबप्रतिबिंबभेदवदन्यमुखमात्र-
संबंधिदर्पणाद्युपाधिस्तस्मिन्मुखे बिंबप्रतिबिंबभेदमापाद्य बिंबमुख्यं परिहृत्य प्रतिबिंबपक्षपाती यथा तद्वज्जी-
वपरभेद— न्यानं तत्सुखचिन्मात्रसंबंध्यविद्यातत्कार्यकरणोपाधिस्तस्मिन्नन्ते तयोर्मात्रे जीवपरमभेदमापाद्य प्र-
तिबिंबस्थानीयजीवपक्षपाती सन्न बिंबस्थानीयपरमात्मपक्षपाती न भवतीत्यन्तः। अनन्तचित्यः परमार्थतः कार्यकर-
णशून्यत्वमाह। ॥न तस्य कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वा-
भाविकी ज्ञानबलक्रिया च॥ न तस्य परमात्मनः कार्यं समष्टिव्यष्ट्यात्मकं शरीरं करणं च समष्टिव्यष्ट्यात्मकं बाह्यं करणं
अंतःकरणं च न विद्यते अद्वितीयसुखानुभूतित्वात् परस्येश्वरस्य न तत्समभ्यधिते न समस्तत्समनश्च तदधिकस्तस्मादधिकश्च
न दृश्यते वेदेषु तदनुयायिषु स्मरणेषु स्मरणानुयायिषु न्यायेषु चानुपरमेश्वरस्यैव कार्यकरणानि नियन्तृत्वं पुराके
षु श्रूयते इत्याशंक्याह पराऽस्य शक्तिर्विविधैव स्वशक्तिमिथ्याचेत् क्षपासौ विविधानां नकार्यकारणप्रकृतित्वात्तद्रूपेण विविधा।
शक्तिर्विविधैव श्रूयत इति अस्य देवस्य पराभूतमप्रकृतिमित्यनेन सर्वव्यापकत्वात् परा—

श्रूयते श्रुतिस्मृत्यादिषु न तु नेति नेतीति प्रतिषिद्धाशेषविशेषस्य परमेश्वरस्य प्रकृतिप्राकृतरूपं स्वाभाविकं न भवति किं तर्हि तद्रूपं स्वाभावि
कमित्याह स्वाभाविकी ज्ञानबलक्रिया चेति ज्ञानबलक्रिया सर्वज्ञेयविषयसर्वकर्तृत्वलक्षणमनुभूतिरूपं क्रिया तासां सर्वज्ञेयाकारसर्वसत्व
गुणपरिणामक्रियालाभियुक्तत्वात् तद्ब्रह्मासत्तयेति क्रियेत्युच्यते सा ईश्वरस्य स्वरूपत्वात् स्वाभाविकी नान्यायत्तेति यावत् बलक्रिया
नाम स्वसंनिधिमात्रेण प्रकृतिप्राकृतं वशीकृत्य नियमयति सा च सर्वकल्पनाधिष्ठानभूतस्येश्वरस्य स्वाभाविकी नान्यायत्ता ।
अथवा बलक्रिया बलं नाम अनन्तसत्ता तस्याः सर्वस्य स्वात्मकत्वात् स्वधातुवाच्यत्वात् क्रियेत्युच्यते क्रियावद्वाच्यत्वेपि नैरपेक्ष्यं
सिध्यति प्रातिपदिकार्थः सत्तेति वचनात् अतस्तस्य सर्वप्रकृतिभेदानन्तसत्तेश्वरस्य स्वाभाविकी नान्यायत्ता परमेश्वरस्यान
न्यपतित्वमीशितृत्वं तस्य स्वातंत्र्यं कार्यत्वं सर्वकारणत्वं कार्योपाधिकानां जीवानां प्रति कारणोपाधितया ... त्वं चाह न त
स्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गं स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिपः ९
तस्य प्रकृतपरमेश्वरस्य कश्चित्कोपि पतिः स्वामी नास्ति लोके जगति न चेशिता नियन्ता पितास्ति नैव तस्य लिङ्गमस्ति येना
सावनुमीयेत प्रपञ्चास्य कार्यदर्शनात्कारणमात्रमेवानुमीयते न कारणविशेषः अतः सर्वज्ञं ... जगत्कारणमित्यस्यार्थ
स्य वेदैकसमधिगम्यत्वं नानुमानगम्यत्वमिति यावत् अथवा कार्यस्याप्यस्मिन्लीनत्वात् लिङ्गं कारणं तु सेश्वरस्य कारणमपि
नास्ति स एवं भूतः परमेश्वर एव स्वमायया सर्वस्य जगतः कारणं करणाधिपाधिपः करणानां सर्वेन्द्रियाणामधिपः सर्वे ३०
न्द्रियसमष्टिविज्ञानक्रियात्मकलिङ्गम् शरीरोपाधिकत्वात् जीवः करणाधिपः तस्याधिपः मूलप्रकृत्युपाधिक ई
श्वरोधिपः स्वामी अथवा करणाधिपश्चासौ वधिपश्चेति करणाधिपाधिपः अनन्तसुखानुभूतिवपुः परमेश्वर एव
जीवरूपेणावस्थितत्वात्तद्रूपेण करणाधिपः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेः तत्र ...
स्य स्वमायोपाधिकत्वेन सर्वेषामधिपश्च लोके कारणत्वेन प्रसिद्धानां महदादीनामधिपत्वेन प्रसिद्धानां हिरण्यगर्भादी
नां च कारणत्वेनाधिपतित्वे नान्यो विद्यते चेत् तेनैव ... तेन तस्यापीश्वरस्य कारणान्तरमधिपत्यंतरं चानुमीयते इत्या

द्वितीयसच्चिदानंदैकरसंवस्तु प्रत्यक्त्वेन विनियोजयेत् योपातिः समोक्षं यातीति संबंधः। तेषामभावे ज्ञानोत्तर
कार्यपूर्वसर्वकारणमात्रतया अधिकाप्यमूलप्रकृतिस्तां मायां सच्चित्सुखैकरसेश्वरमात्रतया अधिकाप्यनमी
श्वरं स्वात्मतयाऽपरोक्षीकृत्य एवमीश्वरैकतापरोक्ष्यात्तेषां सर्वेषां प्रकृतिप्राकृतानामभावे देहे सति कृतकर्मना
शः अनादौ संसारे कृतस्य पुण्यपापाख्यस्य कर्मणो नारब्धफलस्य नाशः एकत्वज्ञानाद्यह सम्यग्ज्ञानादूर्ध्वकाल
भाविनां कर्मणां दग्धकर्तृत्वमूलत्वादश्लेषलक्षणो नाशः कर्मक्षये ऽनुपभोगेन प्रारब्धफलस्य कर्मणः क्षये पा
तिपदे सति मोक्षं याति देहेंद्रियादिप्रतिभासस्यापि दाहाद्विदेहमोक्षं यातीति यावज्ज्ञानत्वतोऽन्यदिति पाठे तत्वतः प्रकृ
तिप्राकृतेभ्यस्तत्त्वेभ्योऽन्यदीश्वरतत्वं यातीत्यर्थः। अथवान्यत्सर्वं तेषां नाशं चित्तवृत्तिः सेगेश्वरतत्वं तत्वतः परमा
र्थतः स्वात्मरूपं यथास्त्रयति तथा यातीति स्वस्येश्वरभावव्यवधायकं प्रकृतिप्राकृतं सर्वं एकत्वज्ञानेन कृत्स्नमात्रतया
विलयं यातीति यत्तद्यानीत्युच्यते। सम्यग्ज्ञानसिद्ध्यर्थमधिकारसिद्ध्यर्थं परमेश्वरोपासनमाह॥ ॥आदिः स
संयोगनिमित्तहेतुः परस्त्रिकालादकलोऽपि दृष्टः। तं विश्वरूपं भवभूतमीड्यं देवं स्वचित्तस्थमुपास्य पूर्वं॥५॥
आदिः सर्वेषामादिः स्वरूपस्फुरणप्रदत्वेनाधिष्ठानभूतः सप्रकृतः परमेश्वरः संयोगनिमित्तहेतुः सम्यक् योगः
संयोगः जीवस्य परेणैक्यापत्तिलक्षणस्तस्य निमित्तानां साक्षात्श्रवणाद्वाचआपकानामेकेन द्वाभ्यामित्यादिनोका
नां हेतुः कारणभूतः अथवा संसारसंयोगनिमित्तानां पुण्यपापानां हेतुः परस्त्रिकालादतीतानागतवर्त्तमान
लक्षणात्त्रिकालात्परः अन्यः कालानवच्छिन्न इत्यर्थः। अकलः कला अवयवा अस्य न संतीत्यकलः निरंश इति या
वत् अथवा प्राणादीनां माताः परमार्थतोऽस्य न विद्यंत इत्यकलः अपिशब्दः सर्वसमुच्चयार्थो दृष्टः श्रवणतः देवु चिद्
सुखदृष्टः प्रकाशितस्तमेवंभूतं विश्वरूपं मुमुक्षुपासकैर्ध्यानरूपमुपास्यते तत्तद्रूपधारिणं अथवा ब्रह्मादिपिपीलि
कांतानि विचित्रसुखदुःखाणु पर्यंतानि विविधानि पाणिपादादीन्यस्येति च विश्वरूपं भवभूतं संसारस्यास्य भूतमी